शिरःस्नातोलब्धोनारायणाद्वरः॥ प्रविवेशपुरंप्रीतोरथमारुह्यकांचनं॥ तस्यरश्मीन्तथाग्राहीत्कंडरीकोद्विजर्षभः॥ चामर
व्यंजनेचापिबाभ्रव्यःसमवाक्षिपत्॥ इदमंतरमित्येवंततःसब्राह्मणस्तदा॥ श्रावयामासराजानंश्लोकंतांसचिवोचतौ॥ ब्रा
ह्मणउ०॥ सप्तव्याधादशार्णेषुमृगाःकालंजरेगिरौ॥ चक्रवाकाःशरद्वीपेहंसाःसरसिमानसे॥ तेभिजाताःकुरुक्षेत्रेब्राह्मणावेद
पारगाः॥

पःशरद्वीपस्तस्मिन्॥ अभिजाताःश्रोत्रियाःकुरुक्षेत्रेदेवयजनकुलेः वेदपारगाइतिस्वतः

DR. BHAU DAJI MEMORIAL

पुरुषार्थोद्दिष्टिःप्रथमद्वितीयजन्मनोरकथनंश्राद्धसूर्वमावितावा॥दीर्घमध्वानंउत्तरमार्गंप्रस्थिताःचलिताःपूर्यंचतेमे।विच्युतत्वाव
श्यवसादयः॥अवसादंप्राप्नुवथ॥स्वस्तरस्मिप्रतोदावित्यादिविशेषणद्वयेनीलपीतोमणिःसितकृष्णगोरितिवदवयवधर्मेपिचारःस
प्रस्थितादीर्घमध्वानंपूर्यंतेम्मोवसादय॥तच्छुत्वामोहमगमद्ब्रह्मदत्तोनराधिप॥सचिवौचास्यपंचालाकंडरीकश्चभारत॥स्वंस्तर
श्मिप्रतोदैर्तोपतितम्मजनाबुभौ॥दृष्ट्वाबभूवुरस्वस्थास्तेराज्ञःसुहृदस्तदा॥मुहूर्तादिवराजासहताभ्यांरथेस्थितः॥प्रतिलभ्य
ततःसंज्ञांप्रत्यागच्छरिंदमः॥ततस्तेतत्परःस्मृत्वायोगंतमुपलभ्यच॥ब्राह्मणंविपुलैरर्थैर्भोगैश्चसमयोजयत्॥अभिषिच्यस्वरा
ज्येचविष्वक्सेनमरिंदमः॥जगामब्रह्मदत्तोथसदारोवनमेवच॥अथैनंसन्नतिर्धीरादेवलस्यसुतातदा॥उवाचपरमप्री
तायोगाद्वनगतंनृपं॥जानंत्यात्वंमहाराजपिपीलिकरुतंतदा॥चोदितःक्रोधमुद्दिश्यसत्कामेनवैमया॥इतोवयंगमि
ष्यामोगतिमिष्टामनुत्तमां॥तेवचोंतर्हितोयोगस्ततःसंस्मारितोमया॥सराजापरमप्रीतःपत्न्यास्तुत्वावचस्तदा॥प्राप्ययोगं
वनादेवगतिंप्रापसुदुर्लभां॥कंडरीकोपियोगात्मासांख्ययोगमनुत्तमं॥प्राप्ययोगगतिंसिद्धोविशुद्धःस्वेनकर्मणा॥क्रमप्र
णीयपांचाल्यःशिक्षांमुत्पाद्यकेवलां॥योगाचार्यगतिंप्रापयशश्चाग्र्यमनुत्तमं॥एवमेतत्पुरावृत्तंममप्रत्यक्षमच्युत॥तद्धार
यस्वगांगेयश्रेयसायोक्ष्यसेततः॥
मुदायेबोद्धव्यंयुगपदधिकरणवाचायाचाद्यामेतिवदेकशेषेवा॥धीरेत्यनेननसापूर्वं
तेरूपकृताकौशिकदायादेयगुरोदौष्ट्यासेवंप्रत्युपकारंकृतवतीतियोराणिकिकयासूचिता॥योगाद्वेतोः॥७॥

करदाचिदितियोगस्यदौर्लभ्यंदर्शयति॥सोमस्याप्यायनायवैइतिवैशाखुग्रहणादन्ममंडलत्वात्सोमस्यतत्प्रकाशस्यचादित्यर
श्मिप्रतिबिंबितत्वात्तदाप्यायनद्वारादित्यस्यैवमुख्यमाप्यायनमितिविवस्वतःश्राद्धदेवत्वमित्युत्तरंलोकस्याप्यायनपरंमुख्यास्तत्पर्य
क॥२८॥इतिचतुर्विंशोऽध्यायः॥पंचविंशेतथाप्येसोसोमस्यात्रेःसमुद्भवः॥तस्यापत्यममुष्मिन्नितस्माद्वंशेसकीर्त्यते॥मानसासे
येचानेधारयंतिस्मतेषांचरितमुत्तमं॥तिर्यग्योनिषुतेजातानजविष्यंतिकर्हिचित्॥श्रुत्वाचेदमुपाख्यानंमहार्थंमहतांगतिं॥यो
गधर्मेहृदिसदापरिवर्तेतभारत॥सतेनैवानुबंधेनकदाचिल्लभतेशमं॥ततोयोगगतिंयातिसिद्धानांचसुदुर्लभां॥वैशं०॥ए
वमेतत्पुरागीतंमार्कंडेयेनधीमता॥श्राद्धस्यफलमुद्दिश्यसोमस्याप्यायनायवै॥सोमोहिभगवान्देवोलोकस्याप्यायनंपरं॥
हरिवंशप्रसंगेनतस्यवंशंनिबोधमे॥ ॥इतिश्रीखिलेषुहरिवंशेपितृकल्पसमाप्तः॥वैशं०॥पितासोमस्यवैराजन्नयज्ञेत्रुभग
वानृषिः॥ब्रह्मणोमानसात्पूर्वंप्रजासर्गंविधित्सतः॥ततोत्रिःसर्वभूतानांतस्थौस्वतनयेर्हितः॥कर्मणामनसावाचाशुभान्येव
चचारसः॥अहिंस्यःसर्वभूतेषुधर्मात्मासंशितव्रतः॥काष्ठकुड्यशिलाभूतऊर्ध्वबाहुर्महाद्युतिः॥अनुत्तरंनामतपोयेनतप्तंम
हत्पुरा॥त्रीणिवर्षसहस्राणिदिव्यानितिहितःश्रुतं॥
कस्मात्विधित्सतःविधानुमिच्छतःतत्रप्रजासर्गं॥अत्रिःस्वतनयेर्हिता
स्तस्थौ॥अतएवसर्वभूतानांकमादिनाहिताम्येवधधारसोत्रिरित्यन्वयःकाष्ठकुड्यशिलाभूतःनिश्चेष्टत्वेनतुल्यः॥८

सोमत्वंचमृतनावंचभावितात्मनस्तुह्यवितस्यवातिवाररूपेण।सोमत्वस्तुतंदेव्योदिशाताःस्मःसकाशात्सर्वभावनः।अथध्याप्यायनहारे
णासर्वलोकोस्यादकथंइत्यर्थरयंविशिनष्टिसद्दातिवेदमयःवेदस्वरूपःधर्मेञ्चात्मायेनसाधर्मात्मामत्येरसंगृह्यतइत्यसत्यसंग्र

ततोहरेततस्तस्यक्षितस्यानिमिषस्यह।सोमत्वंतनुरौदेयेमहासत्वभारत।उद्दमीवक्रमेतस्यसोमत्वंभावितात्मनः।नेत्राभ्यांसो
मसुस्रावदशधाद्योतयन्दिशः।तंगर्भंविधिनाहृष्टादशदेव्योदधुस्तत।समेत्यधारयामासनचताःसमशक्नुवत।सताभ्यःसह
सैवाथदिग्भ्योगर्भप्रभान्वितः।पपातभासयंल्लोकाञ्शीतांशुःसर्वभावनः।नयदाधारणेशक्तास्तस्यगर्भस्यतादिशः।ततस्ताभिस
हैवाशुनिपपातवसुंधरा।पतितंसोममालोक्यब्रह्मालोकपितामह।रथमारोपयामासलोकानांहितकाम्यया।सहिदेवम
यस्तातधर्मात्मासत्यसंगरः।युक्तोवाजिसहस्रेणयुक्तोनेतिहिनःश्रुतं।तस्मिन्निपतितेदेवापुत्रेतेपरमात्मनि।तुष्टुवुर्ब्रह्मण
पुत्रामानसाःसप्तयेश्रुताः।तथैवांगिरसस्तत्रभृगोरेवात्मजेसह।ऋग्भिर्यजुर्भिर्बहुभिरथर्वांगिरसैरपि।तस्यसंस्तूयमान
स्यतेजःसोमस्यभास्वतः।आप्यायमानंलोकांस्त्रीन्भावयन्मासवर्चत।सतेनरथमुख्येनसमागरांतांवसुंधरा।त्रिसप्तकृत्वो
तियशाश्चकारातिप्रदक्षिणं।तस्ययच्च्यावितंतेजःपृथिवीमन्वपद्यत॥

इःसितेनसुवेणापरमात्मानेमनसोधिष्ठातरिपरमात्म
ष्टञ्चात्मामूर्तियस्येतिचावकुलैःसामभिःआप्यायमानंसुमिस्तुतिभिर्वात्रिःसप्तकृत्वःएकविंशतिवारान्।च्यावितंरथरवेगेन
प्रच्युतं

चयोलोकानुराह्याःचतुर्विधाःजरायुजाडजोद्भिस्वेदजाःदशतीर्दशादशादशकानिवपयिदशतमित्यर्थः।हिरण्यवर्णाञ्चापःहिरण्यवर्णाय
ज्ञियास्तान्नआपइतिश्रुतेदेव्यःदेवोयज्ञःतञ्चेवधिम्यःयज्ञियाइत्यर्थः।निधिराश्रयःदेवःसोमःसराजाराज्येनसाम्राज्यविधानेनाहंदो

अषध्यस्तासमुद्भुतातेजसाप्रज्वलेत्युत।तासिद्धर्यस्त्रियोलोकाःप्रजाश्चैवचतुर्विधा।पोष्टाहिभगवान्सोमोजगतोजगतीपते॥
सलब्धतेजाभगवान्संस्तवैस्तैश्चकर्मभिः।तपस्तेपेमहाभागपद्मानांदशतीर्दश।हिरण्यवर्णायादेव्योधारयंत्यात्मनाजगत॥
निधिस्तासामभूद्देवप्रख्यातःस्वेनकर्मणा।ततस्तस्मैददौराज्यंब्रह्माब्रह्मविदांवर।बीजौषधीनांविप्राणामपांचजनमेजय॥
सोभिषिक्तोमहातेजाराजनुराज्येनराजराट्।त्रीन्लोकान्भावयामासस्वभासाभास्वतांवरः।सप्तविंशतिमिंदोस्तुदक्षायिण
महाप्रजाः।ददौप्राचेतसोदक्षोनक्षत्राणीतियाविदुः।सतत्प्राप्यमहाराज्यंसोमःसोमवतांवरः।समाजह्रेराजसूयंसहस्र
शतदक्षिणं।होतास्यभगवानत्रिरध्वर्युर्भगवान्भृगुः।हिरण्यगर्भश्चोद्गाताब्रह्माब्रह्मत्वमीयिवान्।सदस्यस्तत्रभगवा
न्हरिर्नारायणःप्रभुः।सनत्कुमारप्रमुखैराद्यैर्ब्रह्मर्षिभिर्वृतः।दक्षिणामददत्सोमस्त्रील्लोकानितिनःश्रुतं।तेभ्योब्रह्मर्षि
मुख्येभ्यःसदस्येभ्यश्चभारत।तंसिनीचकुहूश्चैवद्युतिपुष्टिःप्रभावसु।कीर्तिर्धृतिश्चलक्ष्मीश्चनवदेव्यःसिषेविरे।प्राप्यावभृथम
व्यग्रःसर्वदेवर्षिपूजितः॥

भार्याइतिशेषःप्रवनंसोमपानसहस्रशतदक्षिणं।लक्षगुणेनदक्षिणं।हिरण्यगर्भश्चचतुराननः।
सूत्रात्मवशिष्ठोवाःसदस्याःसभ्याःसिनीसिनीवाली।शिषेवरेआश्रिताः।अवभृथंयज्ञांतस्नानंमतिर्बुद्धिविनायासकाशात॥

हरि
५८

बन्धनामबलिनातत्र हेतु॥ अनयाहृतागर्वाभिभूता॥ असर्जयत् ददवान् तस्मै अंगिरसे॥ आंगिरसाय बृहस्पतये पिता दशनिमार्गे॥ संरक्षो
पुर्दकेतुमुपेतः उशनाशुक्रः सदैत्यः तस्य सोमस्य पार्ष्णिं जग्राह पृष्ठरक्षको भूत॥ तदा तस्मिन्नेवावसरे॥ अंगिरसः शिष्यो देवो रुद्रो बृ
हस्पतेः पार्ष्णिग्राहो भवि दिव्यं नरेणान्वयः॥ ननु शुक्रस्य बृहस्पतिद्वेषात् सोमपार्ष्णिग्रहणं युज्यते रुद्रस्य केवल हेतुना बृहस्पतेः पार्ष्णि

विरराजाधिराजेशो दशवाद्योतयद्दिशः॥ तस्य तत्राप्य दुष्प्रापमैश्वर्यमृषिसंस्तुतं॥ विबभ्राममतिस्तात विनयादनयाहृता॥ बृ
हस्पतेः सवै भार्यां तारां नाम यशस्विनीं॥ जहार तरसा सर्वानवमत्यांगिरःसुतान्॥ सयाच्यमानो देवैश्च तथा देवर्षिभिः सह॥ नै
व व्यसर्जयत्तारां तस्मै चांगिरसे तदा॥ ससंरब्धस्ततस्तस्मिन्देवाचार्यो बृहस्पतिः॥ उशनातस्य जग्राह पार्ष्णिमंगिरसस्तदा॥ स
तु शिष्यो महातेजाः पितुः पूर्वो बृहस्पतेः॥ पार्ष्णिग्राहोऽभवद्देव प्रगृह्याजगवं धनुः॥ तेन ब्रह्मशिरो नाम परमास्त्रं महात्मना॥
उद्दिश्य देवानुत्सृष्टं येनैषां नाशितं यशः॥ तत्र तद्युद्धमभवत्प्रख्यातं तारकामयं॥ देवानां दानवानां च लोकक्षयकरं मह
त्॥ तत्र शिष्टास्तु ये देवास्तुषिताश्चैव भारत॥ ब्रह्माणं शरणं जग्मुरादिदेवं सनातनं॥ ततो निवार्योशनसं रुद्रं ज्येष्ठं च शंकरं॥
ददावंगिरसे तारां स्वयमेव पितामहः॥ तामंतःप्रसवां दृष्ट्वा तारां प्राह बृहस्पतिः॥ ग्रहणमित्यत आह॥ स हि शिष्य इति बृह राम ५८
स्पतेः॥ पितुरंगिरसः पूर्वो ज्येष्ठः शिष्यः आजगवं अजस्य गोः अगे शृंगाणां निर्मितं॥ एषां देवानां तत्कामयं तारानिमित्तत्वात् देवाः
सोमपक्षस्थास्तु पितृगुरुपक्षस्थाः अंतः॥ प्रसंगशिष्टा॥ अयो नो मा गंतिरो। उत्सृजत। उदसृजत। दस्युहंतमं दस्यूनामतिशयेन
हंतारं॥

आक्षिपत स्वरूपं सं आक्षिपन् स्वरूपसंपेक्षातिरस्कार॥ नता गर्भमिनकत्र प्रतिकूलं अनिष्टावहाय यास्मात्तत्रयासु तिष्ठते॥ उद्देति॥

मद्ययायां तैनेयो नो गर्भे धर्षयितुं कथंचन॥ अयोनावुत्सृजत्तं वै कुमारं दस्युहंतमं॥ इषीकास्तंबमासाद्य ज्वलंतमिव पावकं॥ जातमा
त्रः स भगवान्देवानामाक्षिपद्वपुः॥ ततः संशयमापन्नास्तारामकथयन् सुरोत्तमः॥ सत्यं ब्रूहि सुतः कस्य सोमस्याथ बृहस्पतेः॥ ह्रीय
माना यदा देवान्नाह सा साध्वसाधु वा॥ तदा तां शप्तुमारब्धः कुमारो दस्युहंतमः॥ तं निवार्य ततो ब्रह्मा तारां पप्रच्छ संशयं॥ यदत्र
तथ्यं तद्ब्रूहि तारे कस्य सुतो ह्ययं॥ सा प्रांजलिरुवाचेदं ब्रह्माणं वरदं प्रभुं॥ सोमस्येति महात्मानं कुमारं दस्युहंतमं॥ तं मूर्ध्न्यु
पाघ्राय तदा सोमो धाता प्रजापतिः॥ बुध इत्यकरोन्नाम तस्य पुत्रस्य धीमतः॥ प्रतिकूलं च गगने समभ्युत्तिष्ठते बुधः॥ उत्पादया
मास तदा पुत्रं वै राजपुत्रिका॥ तस्यापत्यं महाराजो बभूवैलः पुरूरवाः॥ उर्वश्यां जज्ञिरे यस्य पुत्राः सप्त महात्मनः॥ प्रसह्य ध
र्षितस्तत्र विवशो राजयक्ष्मणा॥ ततो यक्ष्माभिभूतस्य सोमः प्रक्षीणमंडलः॥ जगाम शरणायाथ पितरं सोऽत्रिमेव तु॥ तस्य
तत्पापशमनं चकारात्रिर्महातपाः॥ स राजयक्ष्मणा मुक्तः श्रिया जज्वाल सर्वशः॥ एतत्सोमस्य वै जन्म कीर्तितं कीर्तिवर्धन॥
वंशमस्य महाराज कीर्त्यमानमतः शृणु॥ धन्यमायुष्यमारोग्यं पुण्यं संकल्पसाधकं॥ सोमस्य जन्म श्रुत्वैव पापेभ्यो विप्रमु
च्यते॥ ॥इति श्रीमत्खिलेषु हरिवंशे सोमोत्पत्तिः॥ ॥

तदुक्तं ज्योतिःशास्त्रे॥ न चोत्पातपरित्यक्तः कदाचिदपि चेन्दुजोऽव्रजन्नु
दयमित्यादि॥ ततो बुधात्॥ वैराजो मनुः तस्य पुत्रिका॥ इडा सत्रउद्भूजेसति॥ इति पंचविंशो॥ ॥

हरि·
५८

षष्टिं शे वर्षाणि ते वंशाः पुरूरवस उत्तम ।। उर्वशी नाम यस्यां प्रासेस्येतास्ते तु विदुर्जना ।। काम्यः कामनीयः दश वर्षाणि तु चैत्ररथे दिव्ये स्थलुस्था
नि पुदशादिशेख्या न्व परान् यथाक्रमं तया उर्वश्या सहावसत् ।। तथा हि ।। चैत्ररथे च नंदने दश वर्षाणि मंदाकिन्यां जज्ञिरे पंच ।। अलका

वेरं ।। बुधस्य तु महाराज विद्वान्पुत्रः पुरूरवा ।। तेजस्वी दानशीलश्च यज्वा विपुलदक्षिणः ।। ब्रह्मवादी पराक्रांतः शत्रुभिर्युधि दुर्जयः ।।
आहर्ता चाग्निहोत्रस्य यज्वा नित्यं महीपतिः ।। सत्यवादी पुण्यमतिः सम्यक्संवृतमैथुनः ।। अतीव त्रिषु लोकेषु यशसाप्रतिमः स
दा ।। तं ब्रह्मवादिनं शांतं धर्मज्ञं सत्यवादिनं ।। उर्वशी वरयामास हित्वा मानं यशस्विनी ।। तया सह स राजा दश वर्षाणि पंच च ।।
पंच षट् सप्त चाष्टौ च दश चाष्टौ च भारत ।। वने चैत्ररथे रम्ये तथा मंदाकिनीतटे ।। अलकायां च विशालायां नंदने च वनोत्तमे ।।
उत्तरान्स कुरून्प्राप्य मनोरथफलद्रुमे ।। गंधमादनपादेषु मेरुशृंगे तथोत्तरे ।। एतेषु वनमुख्येषु सुरैराचरितेषु च ।। उर्व
श्या सहितो राजा रेमे परमया मुदा ।। देशे पुण्यतमे चैव महर्षिभिरभिष्टुते ।। राज्यं स कारयामास प्रयागे पृथिवीपते ।। तस्य
पुत्रा बभूवुस्ते सप्त देवसुतोपमाः ।। दिवि जाता महात्मान आयुर्धीमानमावसुः ।। विश्वायुश्चैव धर्मात्मा श्रुतायुश्च तथापरे ।।
दृढायुश्च वनायुश्च शतायुश्चोर्वशीसुताः ।। जनमेजय उ० ।। गंधर्वी उर्वसी देवी राजानं मानुषं कथं ।। देवानुत्सृज्य संप्राप्ता त
न्मे ब्रूहि बहुश्रुत ।। वै ।।
या पंच विशालायां च दरिकामे षट् ।। नंदने च वनोत्तमे सप्त ।। उत्तरान् कुरून्प्राप्य मनो ।। ८ ।।

राम·
५८

रथान् अभिलषितानर्थान् फलंतीति मनोरथफलद्रुमा येषु तान् ष्टे ।। गंधमादनपादेषु दशमे मेरूत्तरशृंगे ष्टावि ति ।। दिवि स्वर्गे जाताः तत्र

वै० ।। ब्रह्मशापाभिभूता सा मानुषं समुपस्थिता ।। ऐलं तु सा वरारोहा समयात्समुपस्थिता ।। आत्मनः शापमोक्षार्थं समयं सा चकार ह ।।
अनग्नदर्शनं चैव अकामायं च मैथुने ।। द्वौ मेषौ शयनाभ्यासे सदा बद्धौ च तिष्ठतः ।। घृतमात्रं तथाहारं कालमेकं तु पार्थिव ।। य
द्येष समयो राजन् यावत्कालं च ते दृढः ।। तावत्कालं च वत्स्यामि कृतः समयपालतः ।। तस्यास्तं समयं सर्वं स राजा पर्यपालयत् ।।
एवं सावसत् तेन पुरूरवसि भामिनी ।। वर्षाण्येकोनषष्टिं तु तद्युक्ता शापमोहिता ।। उर्वशी मानुषस्थायां गंधर्वाश्चिंतयान्विताः ।।
गंधर्व उ० ।। चिंतयध्वं महाभागा यथा सा तु वरांगना ।। समागच्छेत्पुनर्देवानुर्वशी स्वर्गभूषणा ।। ततो विश्वावसुर्नाम तत्राह वदतां वर
मया तु समयस्तस्याः क्रियमाणः श्रुतः पुरा ।। व्युत्क्रांतसमया सा वै राजानं प्रहास्यते यथा ।। निशायामथवागम्य मेषमेकं जहार सः ।।
मातृवर्द्धते स्तैर्मातु मेकयोश्चारुहासिनी ।। गंधर्वागमनं ज्ञात्वा शापांतं च यशस्विनी ।। राजानमब्रवीत्तत्र पुत्रो मे ह्रियतेति सा ।। ए
वमुक्तो विनिश्चित्य नग्नो नैवोदतिष्ठत ।। नग्नं मां द्रक्ष्यते देवी समयो वितथो भवेत् ।। ततो भूयस्तु गंधर्वा द्वितीयं मेषमाददुः ।।
द्वितीये तु गते मेषे ऐलं देव्यब्रवीदिदं ।। पुत्रो मे ह्रियते राजन् अनाथाया इव प्रभो ।। एवमुक्तस्तदोत्थाय नग्नो राजा प्रधावितः
मेषयोः पदमन्विच्छन् गंधर्वैर्विद्युता द्योतितः ।।+ निशायामथवागम्य मेषमेकं जहार सः ।। मातृवद्वर्तते मातु कयोश्चारुहासिनी
स्वपितृके न उतापष्टिरेकोनषष्टिस्ता ।।

हरि. पदं स्थानमविछन्नगच्छेषयत्॥ उरश्छेगंधर्वैस्त्यक्तौ॥ उरणौ मेषौ॥ गृह्य गदाता मार्गमाणः गवेषयत॥ हैमवतं हैमवत्यां रम्यायां॥

६० उत्सादितायुमविछन्नयया तद्भवनं महत्॥ प्रकाशितं वै सहसा ततो नग्नमवेक्षत॥ नग्नं दृष्ट्वा तिरोभूता सा साप्सरा कामचारिणी॥ तिरो
भूतां तु तां दृष्ट्वा गंधर्वस्यागमं दिवं॥ उरश्छौ चोरणौ दृष्ट्वा राजा गृह्यागतो गृहं॥ अपश्यत्तु वशीं तत्र विललाप सुदुःखित॥ चचार
पृथिवीं चैव मार्गमाण इतस्ततः॥ अथापश्यत्तां राजा कुरुक्षेत्रे महाबलः॥ प्लक्षतीर्थे पुष्करिण्यां हैमवत्यां समाप्लुतां॥ क्रीडंती
मप्सरोभिश्च पंचभिः सह शोभना॥ तां हृष्टां तु ततो दृष्ट्वा विललाप सुदुःखितः॥ सा चापि तत्र तं दृष्ट्वा राजानमविदूरतः॥ उर्वशी ता
सखीः प्राह सराष पुरुषोत्तमः॥ यस्मिन्नहमवात्स्यं वै दर्शयामास तेन पं॥ समाविग्नास्तु तास्सर्वा पुनरेव नराधिप॥ जाये ह तिष्ठ
मनसि घोरे वचसि तिष्ठ ह॥ एवमादीनि सूक्तानि परस्परमभाषत॥ उर्वशी चाब्रवीदैलं सगर्भाहं त्वया विभो॥ संवत्सरात्कुमा
रस्ते भविष्यति न संशयः॥ निशामेकां च नृपते निवत्स्यसि मया सह॥ हृष्टो जगाम राजा स स्वपुरं तु महायशाः॥ गते संवत्सरे॥
भूय उर्वशी पुनरागमत्॥ उषितश्च तया सार्धमेकरात्रं महायशाः॥ उर्वश्यथाब्रवीदैलं गंधर्ववरदास्तव॥ तां ब्रूहि च मह
राज ब्रूहि वै नान्त्वमेव हि॥ वृणीष्व राजसायोज्यं गंधर्वाणां महात्मनां॥ तथेत्युक्त्वा वरं वव्रे गंधर्वाश्च तथास्त्विति॥ पूरयित्वाग्नि
ना स्थालीं गंधर्वा इति तमब्रुवन्॥ अनेनेष्टा सलोकान्प्राप्स्यसि त्वं नराधिप॥ तानादाय कुमारांस्तु नगरायोपचक्रमे॥ निक्षि
प्याग्निमरण्ये तु सपुत्रस्तु गृहं ययौ॥ ब॥

राम॰
६०

Dr. BHAU DAJI

ममता साहुष्यं सालोक्यं वा॥ अरणीयश्चरणेयः समादिशन् उपदिष्टवंतः॥ षड्विंशः उच्यते मा वक्षो वंशः सप्तविंशो प्रतानतः द्वितीयशो न.

तानादाय कुमारांस्तु नगरायोपचक्रमे॥ निक्षिप्याग्निमरण्ये तु स पुत्रस्तु गृहं ययौ॥ अत्रे त्वाग्निं तु नापश्यदश्वत्थं तत्र दृष्टवान्॥
शमीजातं तु तं दृष्ट्वा अश्वत्थं विस्मितस्ततः॥ गंधर्वेभ्यस्तदा शंसदग्निनाशं ततस्तु सः॥ श्रुत्वा तमर्थमखिलमरणीं तु समादिशन्॥
अश्वत्थादरणीं कृत्वा मथित्वाग्निं यथाविधि॥ तेनेष्ट्वा तु स तान् लोकान् प्राप्तवान् नराधिप॥ गंधर्वेभ्यो वरं लब्ध्वा त्रेताग्निं समकल्पय
त॥ एकोग्निः पूर्वमेवासीदैलस्त्रेतामकारयत्॥ एवं प्रभावो राजासीदैलस्तु नरसत्तम॥ देशे पुण्यतमे चैव महर्षिभिरभिष्टुते॥
राज्यं स कारयामास प्रयागे पृथिवीपतिः॥ उत्तरे जाह्नवीतीरे प्रतिष्ठाने महायशाः॥ इति खिलेषु हरिवंशे ऐलोत्पत्तिः॥ वैशं०॥
ऐलपुत्रा बभूवुस्ते सप्त देवसुतोपमाः॥ गंधर्वलोके विदिता आयुर्धीमानमावसुः॥ विश्वायुश्चैव धर्मात्मा श्रुतायुश्च तथापरः॥
दृढायुश्च वनायुश्च शतायुश्चोर्वशीसुताः॥ अमावसोस्तु दायादो भीमो राजाथ राजराट्॥ श्रीमान् भीमस्य दायादो राजासीत्कांचन
प्रभः॥ विद्वांस्तु कांचनस्यापि सुहोत्रोभून्महाबलः॥ सुहोत्रस्याभवज्जह्नुः केशिन्या गर्भसंभवः॥ आजह्रे यो महत्सत्रं सर्वमेधमहा
मखं॥

पुत्रस्य सूत्रमादिनायतः क्रमात्॥ अयमनयः जिद्वितीयपुत्रः॥ ॥-

गंगास्वकायार्द्धेन विनिर्ममे निर्मितवतीं राज्ञा कुशिकस्त्वत्रयः मत्स्यमोन्यो भविष्यतीति त्रासतत्र वेत्स जज्ञिवान् कथमनेत्यजज्ञिवान् तत्रा

पतिजो भेन यं गंगापतित्वे भिसमारह॥ नेछतसावयामास तस्य गंगा च तत्पदः॥ सतया प्लावितं दृष्ट्वा यज्ञवाटं समंततः॥ सोहोभिर
ब्रवीद्गंगां क्रुद्धो भरतसत्तम॥ एषते विफलं यत्नं पिबन्नंतः करोम्यहं॥ अस्य गंगे वलेपस्य सद्यः फलमवाप्नुहि॥ राजर्षिणा ततः
पितां गंगां दृष्ट्वा महर्षयः॥ उपनिन्युर्महाभागां दुहितृत्वेन जाह्नवीं॥ युवनाश्वस्य पुत्रीं तु कावेरीं जह्नुर्वरोहत॥ युवनाश्वस्य शा
पेन गंगार्द्धेन विनिर्ममे॥ कावेरीं सरितां श्रेष्ठां जह्नोर्भार्यामनिंदितां॥ जह्नुस्तु दयितं पुत्रं सुनहं नाम धार्मिकं॥ कावेर्यां जनयामा
स अजकस्तस्य चात्मजः॥ अजकस्य तु दायादो बलाकाश्वो महीपतिः॥ बभूव मृगयाशीलः कुशस्तस्यात्मजोभवत्॥ कुशपुत्रा ब
भूवुर्हि चत्वारो देववर्चसः॥ कुशिकः कुशनाभश्च कुशांबो मूर्त्तिमांस्तथा॥ पल्हवैः सह संवृद्धो राजा वनेचरैः सदा॥ कुशिकस्तु
तपस्तेपे पुत्रमिंद्रसमं प्रभुः॥ लभेयमिति तं शक्रस्त्रासादभ्येत्य जज्ञिवान्॥ पूर्णे वर्षसहस्रे वै ततः शक्रमपश्यत॥ अत्युग्रतप
सा दृष्ट्वा सहस्राक्षः पुरंदरः॥ समर्थः पुत्रजनने स्वयमेवास्य शाश्वतः॥ पुत्रार्थं कल्पयामास देवेंद्रः सुरसत्तमः॥ स गाधिरभव
द्राजा मघवान् कौशिकः स्वयं॥ पौरोकुत्स्यभवद्भार्या गाधिस्तस्यामजायत॥ विश्वामित्रस्तु गाधेयो राजा विश्वरथस्त्वभूत्॥ विश्वरू
द्विश्वजिच्चैव तथा सत्यवती नृप॥ गाधेः कन्या महाभागा नाम्ना सत्यवती शुभा॥ हृष्पूर्णइति॥ स्वर्वसयत् अधिवासयामास॥ तत
श्च पुत्रत्वे कल्पयामास॥ स कस्यां जातः इत्यत आह॥ पौरुकुत्सीति॥ पुरुकुत्सस्य पुत्री भार्या तु कुशिकस्येत्यर्थः॥

उपयोजस्य शापः तु यायं वै स्व ब्रह्मरुः नवमात्मायं रौद्रः विस्मय विपर्यया संकृता॥ आत्मसंस्तंभ कारक पयुक्तवती॥ योगेन॥

तां गाधिः काव्यपुत्राय ऋचीकाय ददौ प्रभुः॥ तस्याः प्रीतः स वै भर्त्ता भार्गवो भृगुनंदनः॥ पुत्रार्थं साधयामास चरुं गाधेस्तथैव च॥
उवाचाहूय तां भर्त्ता ऋचीको भार्गवस्तदा॥ उपयोज्यश्चरुरयं त्वया मात्रा त्वयं तव॥ तस्यां जनिष्यते पुत्रो दीप्तिमान् क्षत्रिय
र्षभः॥ अजेयः क्षत्रियैर्लोके क्षत्रियर्षभसूदनः॥ तवापि पुत्रं कल्याणि धृतिमंतं तपोधनं॥ शमात्मकं द्विजश्रेष्ठं चरुरेष विधा
स्यति॥ एवमुक्त्वा तु तां भार्यामृचीको भृगुनंदनः॥ तपस्यभिरतो नित्यमरण्यं प्रविवेश ह॥ गाधिः सदारस्तु तदा ऋचीकाश्रमम
भ्यगात्॥ तीर्थयात्राप्रसंगेन सुतां द्रष्टुं नरेश्वरः॥ चरुद्वयं गृहीत्वा सा ऋषेः सत्यवती तदा॥ चरुमादाय यत्नेन सा तु मात्रे न्यवेद
यत्॥ माता तु तस्या दैवात्तु दुहित्रे स्वं चरुं ददौ॥ तस्याश्चरुमथाज्ञानादात्मसंस्थं चकार ह॥ अथ सत्यवती गर्भं क्षत्रियांतकरं त
दा॥ धारयामास दीप्तेन वपुषा घोरदर्शने॥ तामृचीकस्ततो दृष्ट्वा योगेनाभ्यनुसृत्य च॥ तामब्रवीद्द्विजश्रेष्ठः स्वां भार्यां वरव
र्णिनीं॥ मात्रासि वंचिता भद्रे चरुव्यत्यासहेतुना॥ जनिष्यति हि पुत्रस्ते क्रूरकर्माति दारुणः॥ भ्राता जनिष्यते चापि ब्रह्मभूतस्त
पोधनः॥ विश्वं हि ब्रह्म तपसा मया तस्मिन् समर्पितं॥ एवमुक्ता महाभागा भर्त्रा सत्यवती तदा॥ प्रसादयामास पतिं पुत्रो मे
नेदृशो भवेत्॥
ध्यानेन न॥ अस्मनुसृत ज्ञाता॥ विश्वं ब्रह्म॥ सर्ववेदात्म समर्पितं संयोजितं॥ ईदृशो भवेत् भर्तुः॥ भवतु॥

ब्राह्मणापसदः ब्राह्मणाधमः इत्येवंभूतः मा न वेदिति पूर्वेण संबंधः न मया राजन् तव कामः संकल्पितः संकल्प्य मम येऽनृतस्तथाय

ब्राह्मणापसदस्त्वं इत्युक्तो मुनिरब्रवीत्॥ नैष संकल्पितः कामो मया भद्रे तथा त्विति॥ उग्रकर्मा भवेत्पुत्रः पितुर्मातुश्च कारणा
त्॥ पुनः सत्यवती वाक्यमेवमुक्ताब्रवीदिदं॥ इच्छँल्लोकानपि मुने सृजेथाः किं पुनः सुतं॥ शमात्मकमृजुं त्वं मे पुत्रं दातुमिहार्ह
सि॥ काममेवंविधः पौत्रो मम स्यात्तव च प्रभो॥ यद्यन्यथा न शक्यं वै कर्तुमेतद्द्विजोत्तम॥ ततः प्रसादमकरोत्स तस्यास्तपसो ब
लात्॥ भद्रे नास्ति विशेषो मे पौत्रे वा वरवर्णिनि॥ त्वया यथोक्तं वचनं तथा भद्रे भविष्यति॥ ततः सत्यवती गर्भं जनयामास भार्ग
वं॥ तपस्यभिरतं दान्तं जमदग्निं शमात्मकं॥ भृगोश्चरुविपर्यासे रौद्रवैष्णवयोः पुरा॥ जमनाद्वैष्णवस्याग्नेर्जमदग्निरजाय
त॥ सा हि सत्यवती पुण्या सत्यधर्मपरायणा॥ कौशिकीति समाख्याता प्रवृत्तेयं महानदी॥ इक्ष्वाकुवंशप्रभवो रेणुर्नाम नरा
धिपः॥ तस्य कन्या महाभागा कामली नाम रेणुका॥ रेणुकायां तु कामल्यां तपोविद्यासमन्वितः॥ आर्चीको जनयामास जाम
दग्न्यं सुदारुणं॥ रामं क्षत्रियहंतारं प्रदीप्तमिव पावकं॥ और्वस्यैवमृचीकस्य सत्यवत्यां महायशाः॥ जमदग्निस्तपोवीर्या
ज्जज्ञे ब्रह्मविदां वरः॥ मध्यमस्य शुनःशेफः शुनःपुच्छ कनिष्ठकः॥ विश्वामित्रं तु दायादं गाधिः कुशिकनंदनं॥

यामयोक्तं त
थास्तु॥ भृगोर्भार्गवस्य ऋचीकस्य जननात्॥ आर्चीको जामदग्निः जामदग्न्यं परशुरामं सुदारुणं रुद्रांशत्वात्॥

भृगोर्ऋचीकस्य प्रसादेन देवश्रवः प्रभृतिः हिरण्याक्षान्ताः शालावत्यां जाताः परे रेणुमहादिदेवलान्ता आख्याताः॥ अष्टकाद्याः इषद्वत्यां॥ गोत्राणि

जनयामास पुत्रं तु तपोविद्याशमात्मकं॥ प्राप्य ब्रह्मर्षिसमतां योऽयं सप्तर्षितां गतः॥ विश्वामित्रस्तु धर्मात्मा नाम्ना विश्वरथः स्मृतः॥ जज्ञे
भृगुप्रसादेन कौशिकाद्वंशवर्द्धनः॥ विश्वामित्रस्य च सुता देवरातादयः स्मृताः॥ प्रख्यातास्त्रिषु लोकेषु तेषां नामानि मे शृणु॥ देवश्रवाः
कतिश्चैव यस्मात्कात्यायनाः स्मृताः॥ शालावत्यां हिरण्याक्षो रेणोर्जज्ञेऽथ रेणुकः॥ सांकृतिर्गालवश्चैव मौद्गल्यश्चेति विश्रुताः॥ मधुच्छं
दो जयश्चैव देवलश्च तथाष्टकः॥ कच्छपो हारितश्चैव विश्वामित्रस्य ते सुताः॥ तेषां ख्यातानि गोत्राणि कौशिकानां महात्मनां॥ पाणि
नो बभ्रवश्चैव ध्यानजप्यास्तथैव च॥ पार्थिवा देवराताश्च शालंकायनबाष्कलाः॥ लोहिता यमदूताश्च तथा कारीषयः स्मृताः॥ सौश्रु
ताः कौशिका राजन् तथान्ये सैंधवायनाः॥ देवला रेणवश्चैव याज्ञवल्क्याघमर्षणाः॥ औदुंबरा ह्यभिष्णातास्तारकायनचुंचुलाः॥ शालाव
त्या हिरण्याक्षाः सांकृत्या गालवास्तथा॥ बादरायणिनश्चान्ये विश्वामित्रस्य धीमतः॥ ऋष्यंतरविवाह्याश्च कौशिकाः बहवः स्मृताः॥
पौरवस्य महाराज ब्रह्मर्षेः कौशिकस्य च॥ संबंधोऽप्यस्य वंशेऽस्मिन् ब्रह्मक्षत्रस्य विश्रुतः॥ विश्वामित्रात्मजानां तु शुनःशेफोऽग्रजः स्मृतः॥
भार्गवः कौशिकत्वं हि प्राप्तः स मुनिसत्तमः॥ विश्वामित्रस्य पुत्रस्तु शुनःशेफोऽभवत्किल॥ हरिदश्वस्य यज्ञे तु पशुत्वे विनियोजितः॥ दे
वैर्दत्तः शुनःशेफो विश्वामित्राय वै पुनः॥ देवैर्दत्तः स वै यस्माद्देवरातस्ततोऽभवत्॥ देवरातादयः सप्त विश्वामित्रस्य वै सुताः॥

पौत्रादयः। सांकृत्यादयस्तु रेणोर्याजताः ऋष्यंतरे प्रवरभेदे विवाह्याः येषां ते ऋष्यंतरविवाह्याः। शुनःशेफो जमदग्नेरनुजः हरिदश्वस्य ह
रिश्चंद्रस्य

हरि॰
६३

पूर्वोक्तोष्टकश्चैव विश्वामित्रपुत्रस्तिश्वामित्रः पावीनरं स्युगमं ।। इतिसप्तविंशः ।। अष्टाविंशेनयश्चायोः कथ्यते रजिविक्रमः ।। मर्हेद्रस्य ध्रुतिः ।। स्व

दृषद्वतीसुतश्चापि विश्वामित्रस्यात्मगः ।। अष्टकस्य सुतो लौहिः प्रोक्तो जह्नुगणो मया ।। अत ऊर्द्धं प्रवक्ष्यामि वंशमायोर्महात्मनः ।। इति
हरिवंशे अष्टमो वंशानुकीर्तने ।। वै० ।। आयोः पुत्राश्चते पंचवर्वे सर्वे वीरा महारथा ।। स्वर्भानुतनया पंच प्रजायां पज्ञिरे नृपः ।। नहु
षः प्रथमं जज्ञे वृद्धशर्मततः परं ।। रंभो रजिरनेनाश्च त्रिषु लोकेषु विश्रुता ।। रजिः पुत्रशतानी हजनयामास पंचवे ।। राजेयमिति
विख्यातं पुत्रमिंद्र नयावहं ।। यत्र देवासुरे युद्धे समुपावे सदारुणो ।। देवासुरासुरश्चैव पितामहमथाब्रुवन् ।। आवयोर्भगवन्यु
द्धे को विजेता भविष्यति ।। ब्रूहि नः सर्वभूतेश श्रोतुमिच्छामि तेवचः ।। ब्रह्मोवाच ।। येषामर्थाय संग्रामे रजिरात्तायुधः प्रभुः ।। योत्स्यते
ते विजेष्यति त्रिंल्लोकान्नत्र संशयः ।। यतो रजिर्धृतिस्तत्र श्रीश्चैव यतो धृतिः ।। यतो धृतिश्च श्रीश्चैव धर्मस्तत्र जयस्तथा ।। ते दे
वादानवा प्रीताः देवेनोक्ता रजेर्जये ।। अभ्ययुर्जयमिच्छंतो वृणानास्तं नरर्षभं ।। सहि स्वर्भानुदौहित्रः प्रभायां समपद्यत ।। राजा
परमतेजस्वी सोमवंशविवर्द्धनः ।। ते हृष्टमनसः सर्वे रजिं देवे तयदेवता ।। ऊचुरस्मज्जयायत्वं गृहाण वरकार्मुकं ।। अथोवा
च रजिस्तत्र तयोर्वैदेवदैत्ययोः ।। अर्थज्ञः स्वार्थमुद्दिश्य यशस्वं च प्रकामयत ।। रजिरुवाच ।। यदि देवगणान्सर्वान्जित्वा वी
र्येण वासवा ।। इंद्रो भवामि धर्मेण ततो योत्स्यामि संयुगे ।। व ।।

गत्वितिहाबुद्धिना पुनः स्वर्भानेराहोयत्रयदा ।। समुपोढेसंग्रामे । देवेन ब्रह्मणोक्ता ।। नर्तर्षि भेरजिंदेशाक्तापुरोगमादेवाः ।।

राम॰
६३

तिष्ठेयाद्देवचोदितः पूर्वं दैवैराज्ञः सःवज्रपाणेः दिवं प्राप्ते मृते स्वाचाराच्छिष्ट भवद्गातन महाश्चव नइति स्वेदः षतिदुर्बलिद्रस्यर्थः ।

देवाः प्रथमतो नृपः प्रतापुर्हृष्टमानसाः ।। एवं यथेष्टं नृपते कामः संपद्यतां तव ।। एवं सुरगणानां तु वाक्यं राजा रजिस्तदा ।। पप्रच्छ
सुरमुख्यांस्तु यथा देवानपृच्छतः ।। दानवा दर्प्यपूर्णास्तु स्वार्थमेवावगम्य दा ।। प्रत्युचुस्तं नृपवरं साभिमानमिदं वचः ।। दानवाऊ ।।
अस्माकमिंद्रः प्रह्लादो यस्यार्थे विजयाप हे ।। अस्मिंस्तु समरे राजंतिष्ठेथा राजसत्तम ।। स तथेति ब्रुवन्नेव देवैरप्यभिचोदितः ।। भविष्य
सिं इंद्र स्त्वं वै देवैरुक्तस्तु पार्थिव ।। जघानदानवान्सर्वान्येवध्या वज्रपाणिनः ।। स विप्रनष्टान्देवानां परमश्रीः श्रियं वशी ।। निहत्य दा
नवान्सर्वानाजहार रजिः प्रभुः ।। ततो राजमहावीर्यं देवैः सह शतक्रतुः ।। रजेः पुत्रोहमित्युक्ता पुनरेवाब्रवीद्वचः ।। इंद्रोसि तात देवा
नां सर्वेषां नात्र संशयः ।। यस्याहमिंद्रः पुत्रस्ते ख्यातिं यास्यामि कर्मभिः ।। स तु शक्रवचः श्रुत्वा वंचितस्तेन मायया ।। तथैवेत्यब्रवी
द्राजा प्रीयमाणः शतक्रतुः ।। तस्मिंस्तु देवसदृशे दिवं प्राप्ते महीपते ।। दायाद्यमिंद्राद् आजह्नुराचारात्तनया रजेः ।। पंच पुत्रशतान्यस्य
तद्वैस्थानं शतक्रतोः ।। समाक्रामंत बहुधा स्वर्गलोकं त्रिविष्टपं ।। ततो बहुतिथे काले समातीते महाबलः ।। हृतराज्योब्रवीच्छ
क्रो हृतभागो बृहस्पतिः ।। इंद्र उवाच ।। बदरीफलमात्रं वै पुरोडाशं विधित्स्व मे ।। ब्रह्मर्षे येन तिष्ठेयं तेजसाप्यायितः सदा ।।
भगवन्कृशोहं विमना हृतराज्यो हुताशनः ।। हृतोजा दुर्बलो मूढो रजेः पुत्रैः कृतः प्रभो ।।

विधिनाविधिना संपादय ।।

हरि॰
६४

नास्तीश्वरः कर्मप्रथमं जगदिति वादतश्चार्थः ॥ प्रयोजनं यस्य तदेव शास्त्रं नास्तिवादार्थशास्त्रं कथांतरे वात्र प्रसंगेपि प्रवक्तुकपदेष्टुपनि

यथेवं चोदितः शक्रस्त्वया स्यां पूर्वमेव हि ॥ त्वविष्यस्यप्रियार्थं विप्रकर्त्तव्यं मयानघ ॥ प्रयतिष्यामदेवेंद्र तत्प्रियार्थं न संशयः ॥ यथा प्रा
गेव राज्यं च न चिरात्प्रतिलप्स्यसे ॥ तथा तथा करिष्यामि माते भूद्विक्लवं मनः ॥ तत कर्म्म चकारस्य तेजसो वर्द्धनं तदा ॥ तेषां च बुद्धि
संमोहमकरोद्बुद्धिसत्तमः ॥ नास्तिवादार्थशास्त्रं हि धर्मविद्वेषणं परं ॥ अपरं तर्कशास्त्राणामसतां तन्मनोनुगं ॥ न हि धर्मप्रधा
नं हि रोचते वै कथांतरे ॥ एतद्बृहस्पतिकृतं शास्त्रं श्रुत्वाल्पचेतसः ॥ पूर्वोक्तधर्मशास्त्राणामनवद्वेषिणा सदा ॥ प्रवक्तुन्यायरहिते
स्वमतं बहु मेनिरे ॥ तेनाधर्मेण ते पापाः सर्वे एव क्षयं गताः ॥ त्रैलोक्यराज्यं शक्रस्तु प्राप्य दुष्प्राप्यमेव च ॥ बृहस्पतिप्रसादाद्वै पा
रां निर्वृतिमभ्यगात् ॥ ते यदा तु सुसंमूढा वेगोन्मत्ता विधर्मिणः ॥ ब्रह्मद्विषश्च संवृत्ता हतवीर्यपराक्रमः ॥ ततो लेभे सुरैश्वर्यमिं
द्रस्थानं तथोत्तमं ॥ हत्वा रजिसुतान्सर्वान्कामक्रोधपरायणान् ॥ य इदं च्यावनं स्थानात्प्रतिष्ठां च शतक्रतु ॥ शृणुयाद्धारयेद्वापि न
स दौरात्म्यमाप्नुयात् ॥ ॥ इति खिलेषु हरिवंशे शक्रच्यवनप्रतिष्ठा नाम ॥ वैशं० ॥ रंभोनपत्यस्त्वासीद्वंशं वक्ष्याम्यनेनसः ॥
अनेनसः सुतो राजा प्रतिक्षत्रो महायशाः ॥ प्रतिक्षत्रसुतस्यापि संजयो नाम विश्रुतः ॥

इति सुखं ॥ संवृत्ता जाताः ॥ इत्यष्टाविंशः ॥ विंशो
नत्र्याधिके ध्याये प्रोक्तं स्थानेन मोचनं ॥ तत्र तु क्षत्रवृद्धस्य धर्म्मं धर्मेति यो भवेत् ॥

राम॰
६४

क्षत्रवृद्धस्य वृद्धधर्मापि रपयायिस्य ॥ शलात्मजः शलः सुनहोत्रस्य मध्यमपुत्रः काशस्य सुनहोत्रस्यैव कनिष्ठपुत्रस्य कलशात्पूर्वं वधस्य र

संजयस्य जयः पुत्रो विजयस्तस्य चात्मजः ॥ विजयस्य कृतेः पुत्रस्तस्य हर्यत्वतः सुतः ॥ हर्यत्वतसुतो राजा सहदेवः प्रतापवान् ॥ सह
देवस्य धर्मात्मा नदीन इति विश्रुतः ॥ नदीनस्य जयत्सेनो जयत्सेनस्य संकृतिः ॥ संकृतेरपि धर्मात्मा क्षत्रधर्मा महायशाः ॥ अ
नेनसः समाख्याता क्षत्रवृद्धस्य मे शृणु ॥ क्षत्रवृद्धात्मजस्तस्य सुनहोत्रो महायशाः ॥ सुनहोत्रस्य दायादास्त्रयः परमधार्मिकाः ॥ का
शः शलश्च द्वावेतौ तथा गृत्समदः प्रभुः ॥ पुत्रो गृत्समदस्यापि शुनको यस्य शौनकाः ॥ ब्राह्मणाः क्षत्रियाश्चैव वैश्याः शूद्रास्तथैव च ॥ श
लात्मजश्चार्ष्टिषेणस्तनयस्तस्य काश्यकः ॥ काशस्य काशयः पुत्रो राजा दीर्घतपास्तथा ॥ धन्वस्तु दीर्घतपसो विद्वान्धन्वंतरिः सुतः ॥
तपसोंते सुमहतो जातो वृद्धस्य धीमतः ॥ पुनर्धन्वंतरिर्देवो मानुषेष्विह जज्ञिवान् ॥ जनमेजय उ० ॥ कथं धन्वंतरिर्देवो मानुषे
ष्विह जज्ञिवान् ॥ एतद्वेदितुमिच्छामि तन्मे ब्रूहि यथातथं ॥ वैशं० ॥ धन्वंतरेः संभवोयं श्रूयतां भरतर्षभ ॥ स संभूतः समुद्रान्मथ
माने मते पुरा ॥ उत्पन्नः कलशात्पूर्वं सर्वतश्च श्रिया वृतः ॥ सद्यः संसिद्धकार्यं हि विष्णुं दृष्ट्वा स्थितः स्थितवान् ॥ अब्जस्त्वमिति हो
वाच तस्मादब्जस्तु स स्मृतः ॥ अब्जः प्रोवाच विष्णुं वै तव पुत्रोस्मि वै प्रभो ॥ विधत्स्व भागं स्थानं च मम लोके सुरेश्वरं ॥ एवमुक्तः स दृ
ष्ट्वा वै तथ्यं प्रोवाच प्रभुस्तं तु ॥ कृतो यज्ञविभागो हि यज्ञिये हि सुरैः पुरा ॥

धानेकजशांगरहात्तेसर्प ॥ ~

हरि
६५

अप्सुजातत्वात् अब्जस्त्वमिति होवाच विष्णुरिति शेषः॥ यज्ञिये यथोद्देशैः विधिर्हे त्रेयज्ञभागः महर्षिभिः भ्वादिभिर्मंत्रैर्वा अर्वाग्भूतत्वा

देवेषु विनियुक्तं च विधिहोत्रं महर्षिभिः॥ न शक्यमुपहोमो वै तुभ्यं कर्तुं कदाचन॥ अर्वाग्भूतोसि देवानां पुत्रत्वं हि न दीश्वरः॥
द्वितीयायां तु संभूत्यां लोके ख्यातिं गमिष्यति॥ अणिमादिश्च ते सिद्धिर्गर्भस्थस्य भविष्यति॥ तेनैव त्वं शरीरेण देवत्वं प्राप्स्यसि प्रभो॥
चरुमंत्रैर्व्रतैर्जप्यैर्यक्ष्यंति त्वां द्विजातयः॥ अष्टधा त्वं पुनश्चैव आयुर्वेदं विधास्यसि॥ अवश्यंभावि ह्यर्थोयं प्राग्दृष्टस्त्वब्जयोनिना॥
द्वितीयं द्वापरं प्राप्य भविता त्वं न संशयः॥ इत्येतस्मै वरं दत्त्वा विष्णुरंतर्दधे पुनः॥ द्वितीये द्वापरे प्राप्ते सौनहोत्रिः स काशिराट्॥ पु
त्रकामस्तपस्तेपे धन्वो दीर्घमिदं तदा॥ प्रपद्ये देवतां यां तु या मे पुत्रं प्रदास्यति॥ अब्जं देवं स पुत्रार्थे तदाराधितवान्नृपः॥ तेन
तुष्टस्स भगवान् अब्जः प्रोवाच तं नृप॥ यदिच्छसि वरं ब्रूहि तत्ते दास्यामि सुव्रत॥ नृपउ०॥ भगवान्यदि तुष्टस्त्वं पुत्रो मे ख्यातिमा
न्भव॥ तथेति समनुज्ञाय तत्रैवांतरधीयत॥ तस्य गेहे समुत्पन्नो देवो धन्वंतरिस्तदा॥ काशिराजो महाराजः सर्वरोगप्र
णाशनः॥ आयुर्वेदं भरद्वाजात्प्राप्येह सभिषक्क्रियं॥ तमष्टधा पुनर्व्यस्य शिष्येभ्यः प्रत्यपादयत्॥ धन्वंतरेस्तु तनयः केतुमानि
ति विश्रुतः॥ अथ केतुमतः पुत्रो वीरो भीमरथः स्मृतः॥ पुत्रो भीमरथस्यापि दिवोदासः प्रजे॥
दानीं तनः संभूतो जन्मनिः अणि
मादिसिद्धिगणः एवं प्राक्कल्पवत्॥ अब्जयोनिना ब्रह्मणा दृष्टतया धिन्वन् षाणायन् देवतां धन्विति प्रीतिकमभिज्वं धन्वंतरि

राम
६५

DR BHAU DAJI MEMORIAL

श्यमनुज्ञाय तिग्मुत्यस्य विनजनराक्षसो क्षनुचरः निकुंभस्य शिवस्य गणमुख्येन विषयांते देशांते॥ गोमत्यां गोमतीतीरे भद्रश्रेण्ये

दिवोदासस्य धर्मात्मा वाराणस्याधिपो भवत्॥ एतस्मिन्नेव काले तु पुरीं वाराणसीं नृप॥ शून्यां निवेशयामास क्षेमको नाम राक्षसः
शप्ता हि सा मतिमता निकुंभेन महात्मना॥ शून्या वर्षसहस्रं वै भवित्री तिन संशयः॥ तस्यां तु शप्तमात्रायां दिवोदासः प्रजेश्वरः
॥विषयांते पुरीं रम्यां गोमत्यां संन्यवेशयत्॥ भद्रश्रेण्यस्य पूर्वं तु पुरी वाराणसी भवत्॥ भद्रश्रेण्यस्य पुत्राणां शतमुत्तमधन्विनां
हत्वा निवेशयामास दिवोदासो नरेश्वरः॥ भद्रश्रेण्यस्य तद्राज्यं हृतं येन बलीयसा॥ जनमेजयउ०॥ वाराणसीं निकुंभस्तु
किमर्थं शप्तवान्प्रभुः॥ निकुंभश्चैव धर्मात्मा सिद्धिक्षेत्रं शशाप सः॥ वैशंपायनउ० दिवोदासस्तु राजर्षिर्नगरीं प्राप्य पार्थि
व॥ वसति स्म महातेजाः स्फीतायां तु नराधिपः॥ एतस्मिन्नेव काले तु कृतदारो महेश्वरः॥ देव्याः स प्रियकामार्थं निवसन् श्वशुरां
तिके॥ देवाज्ञया पार्षदा ये त्वभिरूपास्तपोधनाः॥ पूर्वोक्तैरुपचारैश्च तोषयंति स्म पार्वतीं॥ हृष्यते वै महादेवी मेना नैव प्रहृ
ष्यति॥ जुगुप्सत्यसकृत्तां वै देवी देवं तथैव मा॥ सपार्षदस्त्वनाचारस्तव भर्ता महेश्वरः॥ दरिद्रः सर्व एवासौ शीलं तस्य न वर्त
ते॥ मात्रा तथोक्ता वरदा स्त्रीस्वभावाच्च चुक्रुधे॥ स्मितं कृत्वा तु वरदा भवपार्श्वमियागमत्॥ विवर्णवदना देवी महादेवमभाष
त॥
णस्य परुषं शमदिंमत्युत्रस्य॥ पूर्वोक्तैः पूर्वोध्यासादिभिरुक्तैः जुगुप्सति निंदति निंदामेवाह॥ पार्षद इति॥ शीलमाचारः

हरि॰ निवेशनं गृहे॥स्वप्नेनिदर्शयामासश्चात्मचदर्शनेनप्रत्यक्षवंतमकरोदितितत्वं॥नगर्यतेनरोगोदरे॥ ७॥
६६ नेद्रवशणाम्यहंमेवनयमास्वंनिवेशनं॥तथाकरुमिहादेवसर्वाजोकनवेक्षत॥वासार्थंरोचयामासदृष्धिश्रोकुरुनंदन॥वारा
णस्यांमहातेजासिद्धिक्षेत्रमहेश्वरः॥दिवोदासेनतोज्ञात्वानिविष्टंनगरोभव॥पार्श्वतिष्ठंतिमाहूयनिकुंभमिदमब्रवीत्॥ग
णेश्वरपुरींज्ञात्वाशून्यांवाराणसींकुरु॥मृदुनेवह्युपायेनह्यनिवार्यसपार्थिवः॥ततोगत्वानिकुंभस्तुपुरींवाराणसींतदा॥
स्वप्नेतिदर्शयामासकुंटकंनामनामतः॥श्रेयस्तेहंकरिष्यामिस्थानंमेरचयानघ॥मद्रूपांप्रतिमांकृत्वानगर्यंतेतथैवच॥ त्वत
स्वप्नेययोदिष्टंसर्वंकारितवान्नृप॥पुरीद्वारेतुविज्ञाप्यराजानंचयथाविधि॥पूजांचमहतींतेनित्यमेवप्रयोजयेत्॥गं
धैश्चधूपमाल्यैश्चप्रोक्षणीयैस्तथैवच॥अन्नप्रदानयोगैश्चअत्यद्भुतमिवाभवत्॥एवंसंपूज्यतेतत्रनित्यमेवगणेश्वरः॥
ततोवरसहस्रंतुनगराणांप्रयच्छति॥पुत्रान्हिरण्यमायुश्चसर्वान्कामांस्तथैवच॥राज्ञस्तुमहिषीश्रेष्ठासुयशानामविश्रुता॥
पुत्रार्थमागतादेवीसाध्वीराज्ञाप्रचोदिता॥पूजांतुविपुलांकृत्वादेवीपुत्रमयाचत॥सावत्रैवरमागत्यबहुशःपुत्रकारणात् राम॰
नप्रयच्छंतिपुत्रंहिनिकुंभःकारणेनहि॥राजातुयदिनक्रुद्धःकार्यसिद्धिस्ततोभवेत्॥अथदीर्घेणकालेनक्रोधोराजानमावि ६६
शत्॥भूतंएषमहद्वारिनागराणांप्रयच्छति॥प्रीतोवरानेषयतोममकिंनप्रयच्छति॥प्रीतोवरानेषयतोममकिंनप्रयच्छति
मामके पूज्यतेनित्यंनगर्यांमेसदैवहि॥विज्ञापितोमयार्थेदेव्यामेपुत्रकारणात्॥नददातिचपुत्रस्मकृतघ्नकेनहेतुना

राजकिल्बिषराजावासेकिल्बिषीचेतिसःराजसुकिल्बिषिनिवा॥परंस्थानंगृहंविस्मयादपिगृहद्वेजस्मरणात्वेश्मनितवपितृगृहेनवश्ण
मियनःअविमुक्तंहेतेमेमपगृहमस्ति॥तत्रश्वसुरगृहेगृहंपितृगृहं॥श्वेतर्हितेपुरेतस्मिन्स्थितिविश्वेश्वरविसतियोम्यपरिवा॥
ततोनार्हतिसत्कारंमत्प्रकाशादिशेषतः॥तस्मान्नुनाशयिष्यामिस्थानमस्यदुरात्मनः॥एवंसतुविनिश्चित्यदुरात्माराजकिल्बि
षी॥स्थानंगणपतस्तत्रनाशयामासदुर्मतिः॥भग्नमायतनेदृष्ट्वाराजानमशपत्प्रभुः॥निकुंभउ०॥यस्मादनपराधेनत्वयास्थानं
विनाशितं॥पूरास्यमातथाकस्मातवनूनंभविष्यति॥ततस्तेननुशापेनशून्यावाराणसीतया॥शप्त्वापुरींनिकुंभस्तुमहादे
वमयागमत्॥अकस्मात्तुपुरीसातुधिक्कृतासर्वतोदिशं॥तस्यांपुर्यांततोदेवोनिर्मनेपदमात्मनः॥रमतेतत्रवैदेवोरममा
णोगिरेसुतां॥नरतिंतत्रवैदेवीलभतेगृहविस्मयात्॥वसामनत्रनपुर्यांतुदेवदेवीतथाब्रवीत्॥देवउवाच॥ नाहंवेश्मवि
मोक्षामिअविमुक्तंहिमेगृहं॥नाहंतत्रगमिष्यामिगच्छदेविगृहंप्रति॥प्रहसोवाचभगवांस्त्र्यंबकस्त्रिपुरांतकः॥तस्मात्तद
विमुक्तंहिप्रोक्तंदेवेनवैस्वयं॥एवंवाराणसीशप्ताअविमुक्तंचकीर्तितं॥यस्मिन्वसतिवैदेवोसर्वदेवनमस्कृतः॥युगेषु
त्रिषुधर्मात्मामहादेव्यामहेश्वरः॥अंतर्धानेकलौयातितत्पुरंचमहात्मनः॥ अंतर्हितेपुरेतस्मिन्पुरीनुवसतेपुनः॥एवंवा
राणसीशप्तानिवेशंपुनरागताः॥भद्रश्रेण्यस्यपुत्रस्तुदुर्दमोनामविश्रुतः॥दिवोदासेनबालेतिघृणयासोविवर्जितः॥हैह
यस्यतुदायाद्योहृतवान्स्यमहीपतिः॥आजन्हेपितृदायाद्यंदिवोदासहृतंबलात्॥वैरस्यांतंमहाराजकृत्रियेणविधित्सता
ल्वेतत्रसंधिरार्षःदायादंपुत्रत्वंकृतवान्॥पितृदायाद्यंपितृनाप्यांविधिश्रपताविधातुमिच्छता॥तस्मदुर्दमस्यराज्यंप्रकृतमाहृतं॥

हरि· लोपामुद्राप्रसादेन लोपामुद्रा अगस्त्यभार्या तस्याः प्रसादेन क्षेमस्य निकुंभदत्तस्य निवेशयामास वासयति स्म॥ सन्नतेरलर्कपुत्रस्य॥

६७ दिवोदासदृषद्वत्यां वीरो यज्ञे प्रतर्दनः॥ तेन बालेन दायाद्यं प्रगृहीतं पुनस्तदा॥ प्रतर्दनस्य पुत्रौ द्वौ वत्सभार्गौ सुविश्रुतौ॥ वत्स
पुत्रो ह्यलर्कस्तु सन्नतिस्तस्य चात्मजः॥ अलर्कः काशिराजस्तु ब्रह्मण्यः सत्यसंगरः॥ अलर्कः काशिराजस्तु ब्रह्मण्यः सत्यसंगरः॥
अलर्के प्रति राजर्षिः श्लोको गीतः पुरातनैः॥ षष्टिं वर्षसहस्राणि षष्टिं वर्षशतानि च॥ युवा रूपेण संपन्न आसीत् काशिकुलोद्वहः॥
लोपामुद्राप्रसादेन वरं वरमवाप्तवान्॥ तस्यासीत् सुमहद्राज्यं रूपयौवनशालिनः॥ शापस्यांते महाबाहुर्हत्वा क्षेमकं राक्षसं॥
रम्यां निवेशयामास पुरीं वाराणसीं पुनः॥ सन्नतेरपि दायादः सुनीथो नाम धार्मिकः॥ सुनीथस्य तु दायादः क्षेमो नाम महायशाः॥
क्षेमस्य केतुमान् पुत्रः सुकेतुस्तस्य चात्मजः॥ सुकेतुतनयश्चापि धर्मकेतुरिति श्रुतः॥ धर्मकेतोस्तु दायादः सत्यकेतुर्महारथः॥
सत्यकेतुसुतश्चापि विभुर्नाम प्रजेश्वरः॥ सुविभुस्तु विभोः पुत्रः सुकुमारश्च तत्सुतः॥ सुकुमारस्य पुत्रस्तु धृष्टकेतुः सुधा
र्मिकः॥ धृष्टकेतोस्तु दायादो वेणुहोत्रः प्रजेश्वरः॥ वेणुहोत्रसुतश्चापि भार्गो नाम प्रजेश्वरः॥ वत्सस्य वत्सभूमिस्तु भार्गभूमि राम०
स्तु भार्गवात्॥ एते त्वंगिरसः पुत्रा जाता वंशेऽथ भार्गवे॥ ६७

वत्सस्यालर्कपितुः पुत्रांतरमाह॥ वत्सभूमिस्त्विति भार्गवात् भार्ग
श्याद्धस्मा त्वातु॥ अंगिरसः पुत्रः गाजवसांगिरसवान्॥ भार्गवे विश्वामित्रस्य भार्गवत्वात्॥

काश्यपः काश्यपुत्रत्वात्॥ इत्येकोनविंशः॥ त्रिंशे ययातिचरितं ययातेरन्वयं तथा॥ चरितं च विरक्तस्य गाथा वैराग्यगर्भिणी॥ नहुषस्य
निबोध मे इति यदुक्तं तदाह॥ उत्पन्ना इति॥ पितृकन्यायां सुस्वधाख्यायां पितृणां कन्यायां विरजाख्यायां॥ मोक्षे मोक्षमार्गे॥ य

ज्ञायणा क्रियावेशाः स्वयं पुत्रा महर्षिभिः॥ इत्येते काश्यपाः प्रोक्ता नहुषस्य निबोधतः॥ इति खिलेषु हरिवंशे एकोनविंशः प्रसवः
वेशः॥ उत्पन्नाः पितृकन्यायां विरजायां महौजसः॥ नहुषस्य तु दायादाः षडिंद्रोपमतेजसः॥ यतिर्ययातिः संयातिरायातिः पंच
कोऽनघः॥ यतिर्ज्येष्ठस्तु तेषां वै ययातिस्तु ततः परं॥ ककुत्स्थकन्यां गां नाम लेभे परमधार्मिकः॥ यतिस्तु मोक्षमास्थाय ब्रह्मभूतो
ऽभवन्मुनिः॥ तेषां ययातिः पंचानां विजित्य वसुधामिमां॥ देवयानीमुशनसः सुतां भार्यामवाप सः॥ शर्मिष्ठामासुरीं चैव तनयां
वृषपर्वणः॥ यदुं च तुर्वसुं चैव देवयानी व्यजायत॥ द्रुह्युं चानुं च पूरुं च शर्मिष्ठा वार्षपर्वणी॥ तस्मै शक्रो ददौ प्रीतो रथं परम
भास्वरं॥ असंगं कांचनं दिव्यं दिव्यैः परमवाजिभिः॥ युक्तं मनोजवैः शुभ्रैर्येन भार्यां समुद्वहन्॥ स तेन रथमुख्येन षड्रात्रेणा
जयन्महीं॥ ययातिर्युधि दुर्धर्षस्तथा देवान्सवासवान्॥ पौरवाणां तु सर्वेषां स वै षामभवद्रथः॥ यावत्तु वसुधापो वै कौर
वो जनमेजयः॥ कुरोः पुत्रस्य राजेंद्र राज्ञः परीक्षितस्य च॥ जगाम स रथो नाशं शापाद्गार्ग्यस्य धीमतः॥ गार्ग्यस्य हि सुतं बा
लं स राजा जनमेजयः॥ वाक्क्रूरं हिंसयामास ब्रह्महत्यामवाप सः॥ याते भार्यांतरमाह॥ असंगं अस्खलितगतिं कांचनं
कांचनमयं॥ शापे कारणमाह॥ गार्ग्यस्येति॥ वाक्क्रूरं निष्ठुरभाषणमिति हिंसने हेतुरुक्तः

A3 9 8 A4 THE ASIATIC SOCIETY OF BOMBAY (Established in 1804) Town Hall, Bombay-400 023 amtec A4 8 9

लोहस्य लोहितस्येव गंधो यस्यास्तीति लोहगंधा से विदं दुःखशब्दोतिप्रकारज्ञाने ॥ इंद्रोतः शौनकं इंद्रोताख्यः सौशौनकस्यते ॥ दक्षि

स लोहगंधी राजर्षिः परिधावन्नितस्ततः ॥ पौरजानपदैस्त्यक्तो न लेभे शर्म कर्हिचित् ॥ ततः स दुःखसंतप्तो नालभत्संविदं क्वचि
त् ॥ इंद्रोतः शौनकं राजा शरणं प्रत्यपद्यत ॥ याजयामास चेंद्रोतः शौनको जनमेजयं ॥ अश्वमेधेन राजानं पावनार्थं द्विजोत्तमः
॥ स लोहगंधो व्यनशत्तस्यावभृथमेत्य ह ॥ स च दिव्यो रथो राजन्वस्योश्चेतिपतेस्तथा ॥ देवासुदेवाय प्रीतात्तेभे तस्माद्बृहद्रथ
बृहद्रथात्क्रमेणैव गतो बार्हद्रथं नृपं ॥ ततो हत्वा जरासंधं भीमस्तं रथमुत्तमं ॥ प्रददौ वासुदेवाय प्रीत्या कौरवनंदन ॥ स
प्तद्वीपां ययातिस्तु जित्वा पृथ्वीं ससागरं ॥ व्यभजत्पंचधा राजा पुत्राणां नाहुषस्तथा ॥ दिशि दक्षिणपूर्वस्यां तुर्वसुं प्रतिमान्नृप ॥
प्रतीच्यामुत्तरस्यां तु द्रुह्युं चानुं च नाहुषः ॥ दिशि पूर्वोत्तरस्यां तु यदुं ज्येष्ठं न्ययोजयत् ॥ मध्ये पूरुं च राजानमभ्यषिंचन्नृप नाहुषः
तैरियं पृथिवी सर्वा सप्तद्वीपा सपत्तना ॥ यथाप्रदेशमद्यापि धर्मेण प्रतिपाल्यते ॥ प्रजास्तेषां पुरस्तात्तु वक्ष्यामि नृपसत्त
मः ॥ धनुर्न्यस्य पृषत्कांश्च पंचभिः पुरुषर्षभैः ॥ जरावानभवद्राजा भारमावेश्य बंधुषु ॥ निक्षिप्तशस्त्रः पृथिवीं निरीक्ष्य पृथिवी
पतिः ॥ प्रीतिमानभवद्राजा ययातिरपराजितः ॥ एवं विभज्य पृथिवीं ययातिर्यदुमब्रवीत् ॥ ३ ॥

णपूर्वस्यां आग्नेयकोणे ॥
पूर्वोत्तरस्यां ऐशान्यां यथाप्रदेशं पितृकृतमर्यादामनुल्लंघ्येत्यर्थः ॥ पंचभिः पुरुषर्षभैरभिषिक्तैर्निमित्तभूतैः ॥

जरावान् शुक्रशापादित्यादिपर्वणि पूक्तं ॥ अनिर्दिष्टा अप्रतिशब्दे शिक्षः संक्रामितेति यावत् ॥ पूर्वमादिपर्वणि विस्मा चेति विस्ताचा ब्धसरो

जरां मे प्रतिगृह्णीष्व पुत्र कृत्यांतरेण वै ॥ तरुणस्तव रूपेण चरेयं पृथिवीमिमां ॥ जरां त्वयि समाधाय तं यदुः प्रत्युवाच ह ॥ अनिर्दिष्टा
मया भिक्षा ब्राह्मणस्य प्रतिश्रुता ॥ अनपाकृत्य तां राजन्न ग्रहीष्यामि ते जरां ॥ जरायां बहवो दोषाः पानभोजनकारिताः ॥ तस्माज्जरां
न ते राजन् ग्रहीतुमहमुत्सहे ॥ संतीते बहवः पुत्रा मत्तः प्रियतरा नृप ॥ प्रतिग्रहीतुं धर्मज्ञ पुत्रमन्यं वृणीष्व वै ॥ स एवमुक्तो यदु
ना राजा कोपसमन्वितः ॥ उवाच वदतां श्रेष्ठो ययातिर्गर्हयन्सुतं ॥ क आश्रयस्तवान्योस्ति को वा धर्मो विधीयते ॥ मामनादृत्य दुर्बुद्धे
यदहं तव देशिकः ॥ एवमुक्त्वा यदुं तात शशापैनं स मन्युमान् ॥ अराज्या ते प्रजा मूढ भवित्रीति नराधिप ॥ स तुर्वसुं च द्रुह्युं च प
णुनुं भरतर्षभ ॥ एवमेवाब्रवीद्राजा प्रत्याख्यातश्च तैरपि ॥ शशाप तानपि क्रुद्धो ययातिरपराजितः ॥ यथा ते कथितं पूर्वं मया रा
जर्षिसत्तम ॥ एवं शप्त्वा सुतान्सर्वांश्चतुरः पुरुपूर्वजान् ॥ तदेव वचनं राजा पुरुमप्याह भारत ॥ तरुणस्तव रूपेण चरेयं पृथिवी
मिमां ॥ जरां त्वयि समाधाय त्वं पूरो यदि मन्यसे ॥ स जरां प्रतिजग्राह पितुः पूरुः प्रतापवान् ॥ ययातिरपि रूपेण पूरोः पर्यचरन्म
हीं ॥ समागमिष्णुः कामानामंतं नरतसत्तम ॥ विश्वाच्या सहितो रेमे वने चैत्ररथे प्रभुः ॥ यदा तृप्तः स कामेषु भोगेषु च नराधिप ॥
तदा पूरोः सकाशाद्वै स्वां जरां प्रत्यपद्यत ॥ तत्र गाथा महाराज शृणु गीता ययातिना ॥ याभिः प्रत्याहरेत्कामान्सर्वशोंगानि कूर्मव
त् ॥ न जातु कामः कामानामुपभोगेन शाम्यति ॥

इह शापान्मानुषेंऽस्य ककुद्मकन्यागोनाम्ना वृता ययातिनोद्गतया महेति विवक्षितं

प्रनाहरेतउपसंहरेत्॥ जीर्यंतिशिथिलीभवंति॥ जीर्यतः वयोहानिंप्राप्नुवतः॥ दिव्यंदिविभवममृतपानादि॥ एतेसुखे॥ भृगुतुंगेन

हविषाकृष्णवर्त्मेवभूयएवाभिवर्द्धते॥ यत्पृथिव्यांव्रीहियवंहिरण्यंपशवःस्त्रियः॥ नालमेकस्यतत्सर्वमितिकृत्वानमुह्यति
यदाभावंनकुरुतेसर्वभूतेषुपापकं॥ कर्मणामनसावाचाब्रह्मसंपद्यतेतदा॥ यदान्येभ्योनबिभेतियदाचास्मान्नबि-
भ्यति॥ यदानेच्छतिनद्वेष्टिब्रह्मसंपद्यतेतदा॥ यादुस्त्यजादुर्मतिभिर्यानजीर्यतिजीर्यतः॥ योसौप्राणांतिकोरोगस्तांतृष्णांत्यजतः
सुखं॥ जीर्यंतिजीर्यतःकेशादंताजीर्यंतिजीर्यतः॥ धनाशाजीविताशाचजीर्यतोपिनजीर्यति॥ यच्चकामसुखंलोकेयच्चदिव्यंम-
हत्सुखं॥ तृष्णाक्षयसुखस्यैतेनार्हतःषोडशींकलां॥ एवमुक्त्वासराजर्षिःसदारःप्राविशद्वनं॥ कालेनमहताचापिचचारविपुलं
तपः॥ भृगुतुंगेतपस्तप्त्वातपसोंतेमहायशाः॥ अनश्नन्देहमुत्सृज्यसदारःस्वर्गमाप्तवान्॥ तस्यवंशेमहाराजपंचराजर्षिसत्तमाः
येमाप्तापृथिवीसर्वासूर्यस्येवगभस्तिभिः॥ यदोस्तुशृणुराजर्षेवंशंराजर्षिसत्कृतं॥ यत्रनारायणोजज्ञेहरिर्वृष्णिकुलोद्वहः॥
स्वस्थप्रजावानायुष्मान्कीर्तिमांश्चभवेन्नरः॥ ययातेश्चरितंनित्यमिदंशृणुनराधिपं॥ इतिखिलेषुहरिवंशेययातिचरिते

मद्दातीरेशूलपाणिगिरौ॥ ॥ इतिहरिवंशेउवेडिकायांत्रिंशोध्यायः॥ ३०॥

एकत्रिंशेपुरोर्विशोऽशस्वस्यसमुद्भवः॥ तत्सुव्रमायकहेतयोवंशास्तावन्निरूप्यते॥ वृष्णिवंशप्रसंगेनानंतस्याख्यानात्॥ उत्तमानांउत्तमौवा
पौरुषंपुरुषार्थोयस्मिंस्तं २॥ वर्त्तिकथयिष्यामितत्रनिसौनवमः वनेष्युर्दशमःस्वारलकृताःस्विस्त्वात्मपितृवंशामुरवानिकृतानिद्वि

जनमेजयउ०॥ पूरोर्वंशमहंब्रह्मञ्श्रोतुमिच्छामितत्त्वतः॥ द्रुह्योश्चानोर्यदोश्चैवतुर्वसोश्चपृथक्पृथक्॥ वृष्णिवंशप्रसंगेनस्व
वंशंपूर्वमेवहि॥ विस्तरेणानुपूर्व्याचतद्भवान्वक्तुमर्हति॥ वैशं०॥ शृणुपूरोर्महाराजवंशमग्रेमहात्मनः॥ विस्तरेणानुपूर्व्याच
यत्रजातोसिपार्थिव॥ हंततेकीर्तयिष्यामिपूरोर्वंशमनुत्तमं॥ द्रुह्योश्चानोर्यदोश्चैवतुर्वसोश्चनराधिप॥ पूरोःपुत्रोमहावीर्योरा-
जासीज्जनमेजयः॥ प्राचिन्वांस्तुसुतस्तस्ययःप्राचीमजयद्दिशं॥ प्राचिन्वतःप्रवीरोभून्मनस्युस्तस्यचात्मजः॥ राजाचाभयदोनामम-
नस्योरभवत्सुतः॥ तथैवाभयदस्यासीत्सुधन्वानामपार्थिवः॥ सुधन्वनःसुबाहुश्चरौद्राश्वस्तस्यचात्मजः॥ रौद्राश्वस्यदशार्णेयु
कृकणेयुस्तथैवच॥ कक्षेयुःस्थंडिलेयुश्चसन्नतेयुस्तथैवच॥ ऋचेयुश्चजलेयुश्चस्थलेयुश्चमहाबलः॥ वननित्योवनेयुश्च
पुत्रिकाश्चदशास्त्रियः॥ रुद्राशूद्राचमद्राचमलदामलहातथा॥ खलदाचततोराजन्नलदासुरसापिच॥ तथागोचपलाचस्त्री-
रत्नकूटाचतादश॥ ऋषिर्जातोत्रिवंशेचतासांभर्ताप्रभाकरः॥ रुद्रायांजनयामाससुतंसोमंयशस्विनं॥ स्वर्भानुनाहतेसू-
र्येपितमसाभिद्रुतेदिवोमहीं॥ तमोभिभूतेलोकेचप्रभायेनप्रवर्तिता॥ मानियास्मत्ताःसुधनानोबहुशिरःसंपातिस्तस्यचात्मज
संपातेस्तुरहंपातीरौद्राश्वस्यैवसुतः॥ रौद्राश्वस्यघृताच्यांवैदशसूनवः॥ कृतेयुप्रथमस्तेषांकृकणेयुस्तथैवच॥ कृपाव

हरि

३०

ऋषिश्रेष्ठानि अत्र मुख्यानि धनमशिष्टं सुरैः॥ संदेहा याकरणेन तुष्टैः॥ प्रवर्त्तितं दत्तं पुत्रिकासु पुत्रिकाकरणविधिनातु मंकल्पं प्रशस्यामि

स्वस्तितेस्वस्ति चो क्तो वै पतमा नोदिवो मदं॥ ऋषिश्रेष्ठानि गोत्राणि यश्च कारमहातप॥ यत्रैषत्रे दत्तं नैयस्य सुरश्चैव प्रवर्त्तितं॥ सतासु
जनयामास पुत्रिकासु सनामकान्॥ दशपुत्रान्महात्मा सौतपस्युग्रेरतान्सदा॥ तेतु गोत्रकरा राजन्नृषयो वेद पारगाः॥ स्व
स्त्यात्रेयाइतिख्याताः किं त्वत्रिधन वर्जिताः॥ कक्षेयोस्त्रनयाश्चासंस्त्रयएव महारथ॥ सभानरश्चाक्षुकश्च परमेक्षुस्तथैव च॥ स
भानरस्य पुत्रस्तु विद्वान्कालानलोनृप॥ कालानलस्य धर्मज्ञः संजयो नाम वै सुतः॥ संजयस्याभवत्पुत्रो वीरो राजा पुरंजयः॥ जनमे
जयो महाराज पुरंजयसुतो भवत्॥ जनमेजयस्य राजर्षे महाशालोभवत्सुतः॥ देवेषु सपरिज्ञातः प्रतिष्ठित यशो भुवि॥ महाम
नानाम सुतो महाशालस्य धार्मिकः॥ यज्ञे वीरसुरगणैः पूजितः सुमहामना॥ महामनास्तु पुत्रो द्वौ जनयामास भारत॥ उशी
नरं च धर्मज्ञं तितिक्षुं च महाबलं॥ उशीनरस्य पत्न्यस्तु पंचराजर्षिवंशजा॥ नृगा कृमिर्नवा दर्वा पंचमी वदृषद्वती॥ उशीन
रस्य पुत्रास्तु पंच तासु कुलोद्वहः॥ तपसा चैव महता जाता वृद्धस्य चात्मजा॥ नृगायास्तु नृगः पुत्रः कृम्यां कृमिरजायत॥ नवा
यास्तु नवः पुत्रो दर्व्यायां सुव्रतो भवत्॥ दृषद्वत्यास्तु संजज्ञे शिबिरौशीनरो नृप॥ शिबेस्तु शिबयस्तात यौधेयास्तु नृगस्य ह॥ न
वस्य नवराष्ट्रं तु कृमिस्तु कृमिलापुरी॥ देवाग्निगुरुसन्निधौ॥ अस्यां यो जायते पुत्रः समः पुत्रो भवेद्यदि तिन्नाचोबंधेन प्रा
प्तासु॥ अतएव वदस्यति किं चित्त्रिधन वर्जिताः॥ इतिकक्षेयो संज्ञाश्च सुतश्च॥

रामः

३०

Dr BHAU DAJI MEMORIAL

तितिक्षोमन्वममनसो ऽपरस्तु त्रस्य जौमो पूर्वजन्मनि महायोगी बलिर्दानवेंद्रो मनुपुनः मानुषजौ नोपान इत्यर्थः॥ बलेस्तु सुतपः पुत्रस्तापि ब्रस्

पुत्रं तस्य तयो बष्टा शिवि पुत्रान्निबोध मे॥ शिबेस्तु शिबयः पुत्राश्चत्वारो लोकविश्रुताः॥ वृषदर्भः सुवीरश्च कैकेयो मद्रकस्तथा॥ ते
षां जनपदाः स्फीताः मद्रकाः कैकयास्तथा॥ वृषदर्भाः सुवीराश्च तितिक्षोस्तु प्रजाः शृणु॥ तितिक्षुरभवद्राजा पूर्वस्यां दिशि भारत॥ उष
द्रथो महाराज फेनस्तस्य सुतोभवत्॥ फेनात्तु सुतपा याता सुतः सुतपसो बलिः॥ जातो मानुषजानोनु स राजा कांचनेषुधिः॥ म
हायोगी स तु बलिर्बभूव नृपतिः पुरा॥ पुत्रानुत्पादयामास पंच वंशकरान्भुवि॥ अंगः प्रथमतो यज्ञे वंगः सुह्मस्तथैव च॥ पुंड्र
कलिंगश्च तथा बालेयं क्षत्रमुच्यते॥ बालेया ब्राह्मणाश्चैव तस्य वंशकरा भुवि॥ बलेस्तु ब्रह्मणा दत्तो वरः प्रीतेन भारत॥ महायो
गित्वमायुश्च कल्पस्य परिमाणतः॥ संग्रामे चाप्यजेयत्वं धर्मे चैव प्रधानता॥ त्रैलोक्यदर्शनं चापि प्राधान्यं प्रसवे तथा॥ बले
चाप्रतिमत्वं वै धर्मतत्वार्थदर्शनं॥ चतुरो नियतान्वर्णांस्त्वं च स्थापयिता इति॥ इत्युक्तो विभुना राजा बलिः शांतिं परं ययौ॥ त
स्य ते तनयाः सर्वे क्षेत्रजा मुनिपुंगवात्॥ संभूता दीर्घतपसः सुदेष्णायां महौजसः॥ बलिना निःषिच्य द्रुपवत्पुत्रान कल्मषान्
कृतार्थः सो पियोगात्मा योगमाश्रित्य सप्रभुः॥ अद्दृश्यः सर्वभूतानां कालापेक्षी चरन्नपि॥
णः त्रैलोक्यदर्शनं व्यवदितत्वानं॥
प्रसवे अग्रस्य नुत्वायां सनतीवा॥ विभुना ब्रह्मणा शांतिं ययौ सुखं मासः क्षेत्रजा बलेः दीर्घतमा ब्रह्मणो वरदानोक्त्वा॥

हरि
३१

वरितिजीवन्मुक्ततयासंस्थानंसुतलं॥ शांतासुताश्चोदशरथात्माख्याविताः अपुत्रत्वात्॥ ऋष्यशृंगस्यशांताभर्तुः प्रसादेनपूर्णभिद्रस्य
कालेनमहताराजन्स्वंसंस्थानमुपेयिवान्॥ तेषांजनपदाःपंचअंगावंगाससुह्मकाः॥ कलिंगापुंड्रकाश्चैवप्रजास्त्वंगस्यमेशृणु॥
अंगपुत्रोमहानासीद्राजेंद्रोदधिवाहनः॥ दधिवाहनपुत्रस्तुराजादिविरथोभवत्॥ पुत्रोदिविरथस्यासीच्छक्रतुल्यपराक्रमः॥
विद्वान्धर्मरथोनामतस्यचित्ररथःसुतः॥ तेनधर्मरथेनाथतदाकालंजरेगिरौ॥ यजतासहशक्रेणसोमःपीतोमहात्मना॥
अथचित्ररथस्यापिपुत्रोदशरथोभवत्॥ लोमपादइतिख्यातोयस्यशांतासुताभवत्॥ तस्यदाशरथिर्वीरश्चतुरंगोमहायशाः॥
ऋष्यशृंगप्रसादेनयज्ञेकुलविवर्द्धनः॥ चतुरंगस्यपुत्रस्तुपृथुलाक्षइतिस्मृतः॥ पृथुलाक्षसुतोराजाचंपोनाममहायशाः॥
चंपस्यतुपुरीचंपायामालिन्यभवत्पुरा॥ पूर्णभद्रप्रसादेनहर्यंगोस्यसुतोभवत्॥ ततोवैभांडकैस्तस्यवारणंशक्रवारणं॥
अवतारयामासमहीमंत्रैर्वाहनमुत्तमं॥ हर्यंगस्यतुदायादोराजाभद्ररथःस्मृतः॥ पुत्रोभद्ररथस्यासीद्बृहत्कर्माप्रजेश्व
रः॥ बृहद्दर्भःसुतस्तस्यतस्माज्जज्ञेबृहन्मनाः॥ बृहन्मनास्तुराजेंद्रोजनयामाससवैसुतं॥ नाम्नाजयद्रथंनामयस्माद्दृढरथोनृ
प॥ आसीद्दृढरथस्यापिविश्वजिज्जनमेजय॥ दायादस्तस्यकर्णस्तुविकर्णस्तस्यचात्मजः॥ तस्यपुत्रशतंत्वासीदंगानांकुल
वर्द्धनं॥ बृहद्दर्भसुतोयस्तुराजानाम्नाबृहन्मनाः॥ तस्यपत्नीद्वयंचासीच्चैद्यस्यैतेसुतेशुभे॥ यशोदेवीचसत्याचताभ्यांवंशः
प्रपद्यते॥ जयद्रथस्तुराजेंद्रयशोदेव्यांव्यजायत॥ मुनिश्रेष्ठस्यप्रसादेनवैभांडकैःऋष्यशृंगः॥ तस्यहर्यंगसः

राम०
३१

ब्रह्मक्षत्रोत्तरःब्राह्मणोऽस्त्रोत्मादिनाःक्षत्रियेभ्योपार्यादिनाविशिष्टइत्यर्थः॥ सूतःसुतपसोब्राह्मण्यांपुत्रजातत्वात्ब्राह्मण्यांक्षत्रि
यासुतःइतिवचनात्तत्वंचैयोशैऽस्यपुत्रस्य॥ इत्येकत्रिंश॥ ३१॥ द्वात्रिंशेवर्ण्यतेवंशस्तत्वेयोविविधोवतः॥ त्रय्यारुणयपुरुख्यानांमज
ब्रह्मक्षत्रोत्तरशांतविजयोनामविश्रुतः॥ विजयस्यधृतिःपुत्रस्तस्यपुत्रोधृतव्रतः॥ धृतव्रतस्यपुत्रस्तुसत्यकर्मामहाव्रतः॥ सत्य
कर्मसुतस्यापिसूतस्त्वधिरथस्तुवै॥ यःकर्णंप्रतिजग्राहततःकर्णस्तुसूतजः॥ एतद्वःकथितंसर्वंकर्णंप्रतिमहाबलं॥ कर्णस्यवृ
षसेनस्तुवृषसेनात्मजःस्मृतः॥ एतेंगवंशजाःसर्वेराजानःकीर्तितामया॥ सत्यव्रतामहात्मानःप्रजावंतोमहारथाः॥ ऋचेयो
स्तुमहाराजरौद्राश्वतनयस्यवै॥ शृणुवंशमनुप्रोक्तंयत्रजातोसिपार्थिव॥ इतिखिलेषुहरिवंशेकक्षेयुवंशानुकीर्तनं॥ वैशं
पायनउ॥ अनाधृष्णुस्तुराजर्षिःकक्षेयुश्चैकराट्स्मृतः॥ ऋचेयोर्ज्वलनानामभार्यावितक्षकात्मजा॥ तस्यांदेव्यांसराजर्षिम
तिनारोमहीपतिं॥ मतिनारसुतास्त्वासंस्त्रयःपरमधार्मिकाः॥ तंसुरोधःप्रतिरथःसुबाहुश्चैवधार्मिकः॥ गौरीकन्याचवि
ख्यातामांधातृजननीशुभा॥ सर्ववेदविदस्तातब्रह्मण्याःसत्यवादिनः॥ सर्वेकृतास्त्राबलिनःसर्वेयुद्धविशारदाः॥ पुत्रोप्रतिर
थस्यासीत्कण्वःसमभवन्नृप॥ मेधातिथिःसुतस्तस्ययस्मात्काण्वोभवद्द्विजः॥ इलिनातुरयस्यासीत्कन्यावैजनमेजय॥ ब्रह्म
वादिन्यधिस्त्रीचतंसुस्त्रामधिगच्छत॥ तंसुरोधोराजर्षिर्धर्मनेत्रःप्रतापवान्॥ मीदस्यचधूर्यः अनाधृष्णुः अभिनवितुस्स
मशाककेयुरेव॥ तंसुरोधकेनाम॥ अप्रतिरथस्ययःपुत्रोब्राह्मणःकाण्वस्तस्माद्यस्मिन्नवदित्यन्वयः॥

हरि॰ ७२

अतएवाह॥ यस्मात्कारणाद्याद्दिज इति तस्य मेधातिथिः॥ हे नृप जनमेजय अध्यात्ताउन्नमास्तौ तं सुसुरो धाद्स्य धर्मेनैव धर्मणा
नेत्रं प्रवर्त्तते कोयस्यसः आदिपर्वणि॥ क्रतुभिरिष्टिमरुद्भिः संक्रामितः भरतपुत्रतां गमितः वितथे स्वमात्रर्भिः पुत्रघातनात् अत्र

भ्रष्टवादिपराक्रांतस्तस्य जायेयिदानवै॥ उपदानसुतां लेभे चतुरस्तान्सुरोद्यतः॥ उक्तं तमयसुप्तं तं प्रवीरमनघं तथा॥ दुष्कं
तस्य तु दायादो भरतो नाम वीर्यवान्॥ स सर्वदमनो नाम नागायुतबलो महान्॥ चक्रवर्त्ती सुतो यो हि दुष्कंतस्य महात्मनः॥
शकुंतलायां भरतो यस्य नाम्ना स्म भारत॥ दौष्कंतं प्रति राजानं वागुवाचाशरीरिणी॥ भस्त्रा माता पितुः पुत्रो येन जातः स एव सः
भरस्व पुत्रं दुष्कंत मा चमंस्थाः शकुंतलां॥ भरतस्य विनष्टेषु तनयेषु महीपते॥ मातृणां तात कोपेन मया ते कथितं यथा॥
बृहस्पतेरांगिरसः पुत्रो राजन्महामुनिः॥ संक्रामितो भरद्वाजो मरुद्भिः क्रतुभिर्विभुः॥ अत्रैवोदाहरंतीमं भरद्वाजस्य धीमतः
धर्मसंक्रमणं चापि मरुद्भिर्भरताय वै॥ अयाजयाम भरद्वाजो मरुद्भिः क्रतुभिर्हितं॥ पूर्वं तु वितथे तस्य कृते वै पुत्रजन्मनि॥
अथ ततोथ वितथो नाम भरद्वाजसुतोभवत्॥ ततोथ वितथे जाते भरतेस्तु दिवं ययुः॥ वितथं चाभिषिच्याथ भरद्वाजो वनं ययौ॥
स चापि वितथः पुत्राञ्जनयामास पंच वै॥ सुहोत्रं च सुहोतारं गयं गर्गं तथैव च॥ कपिलं च महात्मानं सुहोत्रस्य सुतद्वयं॥
काशिकश्च महासत्वस्तथा गृत्समतिर्नृप॥ तथा गृत्समतेः पुत्रा ब्राह्मणाः क्षत्रिया विशः॥ काशिकस्य तु काशेयः पुत्रो दीर्घतपा
स्तथा॥ बभूव दीर्घतपसो विद्वान्धन्वंतरिः सुतः॥ धन्वंतरेः सुतनयः केतुमानिति विश्रुतः॥

गृत्समतेरारस्य स्मृतः शस्त्रं भरतस्यास्मिन्नेसंतेनथेयेपोनरुक्तमिवाज्ञाति॥ तत्रापिकृतचित्राम नेदः पुरुषसंख्यानेदसु अत्रकस्यभेदाभिप्राय

मितदित्यवगम्यते॥ कोशेः काशिकस्य काशेयः पुत्रा नेषादीर्घतपास्वेष्टत्वेन पृथक् गृहीतः॥ अष्टदशप्रतर्दनाख्यः भीमरथस्य भीमः रांबु

अथ केतुमतः दितो विद्वानभीमरथः स्मृतः॥ दिवोदास इति ख्यातः सर्वरक्षःप्रणाशनः॥ एतस्मिन्नेव काले तु पुरीं वाराणसीं नृपः॥ शू
न्यां निवेशयामास क्षेमकं राक्षसः॥ सप्ता हि सा मनिमता निकुंभेन महात्मना॥ शून्या वर्षसहस्रं वै नवित्रीं भरतर्षभ॥ तस्यां तु शू
न्यमात्रायां दिवोदासः प्रजेश्वरः॥ विषयांते पुरीं रम्यां गोमत्यां सोन्यवेशयत्॥ भद्रश्रेण्यस्य पुत्राणां शतमुत्तमधन्विनां॥ हत्वा नि
वेशयामास दिवोदासः प्रजेश्वरः॥ दिवोदासस्य पुत्रस्तु वीरो राजा प्रतर्दनः॥ प्रतर्दनस्य पुत्रौ द्वौ वत्सो भार्गवरावतु॥ अलर्को
तपुत्रस्तु राजा सन्नतिमाननुविः॥ हैहयस्य तु दायादो ह्यकृतवत्र महीपते॥ आजहे पितृदायाद्यं दिवोदासहृतं बलात्॥ भद्र
श्रेण्यस्य पुत्रेण दुर्दमेन महात्मना॥ दिवोदासेन बालेति घृणया स विवर्जितः॥ अष्टारथो नाम नृपः सुतो भीमरथस्य वै॥ तेन पु
त्रेण बालस्य प्रहृतं तस्य भारत॥ वैरस्यांतं महाराज क्षत्रियेण विधित्सता॥ अलर्कः काशिराजस्तु ब्रह्मण्यः सत्यसंगरः॥ षष्टिंव
र्षसहस्राणि षष्टिं वर्षशतानि च॥ तस्यासीत्सुमहद्राज्यं रूपयौवनशालिनः॥ वायुरूपेण स पत्रं आसीत्काशिकुलोद्वहः॥ लोपा
मुद्राप्रसादेन परमायुरवाप सः॥ वयसोंते महाराज हत्वा क्षेमकराक्षसं॥ रम्यां निवेशयामास पुरीं वाराणसीं नृप॥

नाषणेरथोयस्य दिवोदासस्य तस्य॥ जातइति शेषः तेन प्रतर्दनेन तस्य दुर्दमस्य बलमानितशेषः अतर्कः प्रतर्दनपुत्रः॥

राम॰ ७२

हरि॰ ७३

अलर्कस्य तु दायादः क्षेमको नाम पार्थिवः॥ क्षेमकस्य तु पुत्रो वै वर्षकेतुस्ततो ऽभवत्॥ वर्षकेतोस्तु दायादो विभुर्नाम प्रजेश्वरः॥ आन
र्तस्तु विभोः पुत्रः सुकुमारस्ततो ऽभवत्॥ सुकुमारस्य पुत्रस्तु सत्यकेतुर्महारथः॥ सुतो ऽभवन्महातेजा राजा परमधार्मिकः॥ वत्स
स्य वत्सभूमिस्तु भार्गभूमिस्तु भार्गवात्॥ एते त्वंगिरसः पुत्रा जाता वंशे ऽथ भार्गवे॥ ब्राह्मणाः क्षत्रिया वैश्यास्त्रयः शूद्राश्च भरतर्षभ॥ सु
होत्रस्याथ बृहत्पुत्रो बृहतस्तनयास्त्रयः॥ अजमीढो द्विमीढश्च पुरुमीढश्च वीर्यवान्॥ अजमीढस्य पत्न्यस्तु तिस्रो वै यशसान्वि
ताः॥ नीलिनी केशिनी चैव धूमिनी च वरांगना॥ अजमीढस्य केशिन्यां जह्नुर्जज्ञे प्रतापवान्॥ आजह्ने यो महासत्रं सर्वमेधमहाम
खे॥ पतिलोभेन यं गंगा विनीताभिससार ह॥ नेच्छतः प्लावयामास तस्य सा गंगा च तत्सदः॥ तत्तया प्लावितं दृष्ट्वा यज्ञवाटं समंत
तः॥ जह्नुरथाब्रवीद्गंगां क्रुद्धो भरतसत्तम॥ एष ते त्रिषु लोकेषु संक्षिप्यापः पिबाम्यहं॥ अस्य गंगे ऽवलेपस्य सद्यः फलमवाप्नु
हि॥ ततः पीतां महात्मानो दृष्ट्वा गंगां महर्षयः॥ उपनिन्युर्महाभागां दुहितृत्वेन जाह्नवीं॥ युवनाश्वस्य पुत्रीं तु कावेरीं जह्नुरावे
हत्॥ गंगाशापेन देहार्धं यस्याः पश्चान्नदीकृतं॥ जह्नोस्तु दयितः पुत्रो जह्नको नाम वीर्यवान्॥ अजकस्य तु दायादो बलाको
श्वो महीपतिः॥ बभूव मृगयाशीलः कुशिकस्तस्य चात्मजः॥ पह्लवैः सह संवृद्धो राजा वनचरैस्तदा॥ कुशिकस्तु तपस्तेपे
पुत्रमिंद्रसमं प्रभुः॥ लभेयमिति तं शक्रस्त्रासादभ्येत्य जज्ञिवान्॥ स गाधिरभवद्राजा मघवान्कौशिकः स्वयं॥ विश्वा
मित्रस्तु गाधेयो राजा विश्वरथस्तदा॥ वा॥

सुयहात वितथपुत्रस्य॥ वा॥-

राम॰ ७३

सत्यवति विश्वामित्र विश्वरथ विश्वजिद्विश्वकृता कनीयसा च सा॥ जज्ञे भीढस्य सूनुः पुत्रस्य पत्न्यंतरे प्रभवां नरमाह्रा अजमीढस्य। पंच
विश्वजिद्विश्वकृच्चैव तथा सत्यवती नृप॥ ऋचीकाज्जमदग्निस्तु सत्यवत्यामजायत॥ विश्वामित्रस्य तु सुता देवरातादयः स्मृताः॥ प्रख्या
ताः त्रिषु लोकेषु तेषां नामानि मे शृणु॥ देवश्रवाः कतिश्चैव यस्मात्कात्यायनाः स्मृताः॥ शालावत्या हिरण्याक्षो रेणुर्यस्याथ रेणुका॥
सांकृत्यो गालवो राजन्मौद्गल्यश्चेति विश्रुताः॥ तेषां ख्यातानि गोत्राणि कौशिकानां महात्मनां॥ पाणिनो बभ्रवश्चैव ध्यानजप्यास्तथै
व च॥ पार्थिवा देवराजश्च सालंकायनसौश्रवाः॥ लोहित्या यमदूताश्च तथा कारीषयः स्मृताः॥ विश्रुताः कौशिका राजंस्तथान्ये सैंध
वायनाः॥ ऋष्यंतरविवाह्याश्च कौशिका बहवः स्मृताः॥ पौरवस्य महाराज ब्रह्मर्षेः कौशिकस्य च॥ संबंधो ऽप्यस्य वंशे ऽस्मिन्ब्रह्मक्ष
त्रस्य विश्रुतः॥ विश्वामित्रात्मजानां तु शुनःशेफो ऽग्रजः स्मृतः॥ भार्गवः कौशिकत्वं हि प्राप्तः स मुनिपुंगवः॥ देवरातादयश्चान्ये
विश्वामित्रस्य वै सुताः॥ दृषद्वतीसुतस्यापि विश्वामित्रात्तथाष्टकः॥ अष्टकस्य सुतो लौहिः प्रोक्तो जह्नुगणो मया॥ अजमीढा
परो वंशः श्रूयतां भरतर्षभ॥ अजमीढात्तु नीलिन्यां सुशांतिरुदपद्यत॥ पुरुजातिः सुशांतेश्च बाह्याश्वः पुरुजातितः॥ बाह्या
श्वतनयाः पंच बभूवुरमरोपमाः॥ मुद्गलः सृंजयश्चैव राजा बृहदिषुस्तथा॥ यवीनरश्च विक्रांतः क्रिमिलाश्वश्च पंचमः॥ पंचैते
रक्षणापाले देशानामिति विश्रुताः॥ पंचानां विद्धि पांचालान्स्फीतान्जनपदावृतान्॥ च मे पंचानां देशानां रक्षणाय अलं समर्था इ
ति एवं निर्वचनं श्रुतं नो ऽस्माभिरिति संबंधः॥

हरि. देवोऽसौ पूर्वस्मादन्यः शरद्वतो गौतमस्तस्य पूर्वं तावच्छरद्वतो गौतमादेव कृपजन्म इदानीं तदंशापत्यसंततिरुच्यते तत्रेयं कथा क
दाचिच्छरद्वतं उग्रं तपः कुर्वंतं दृष्ट्वा तद्विघातार्थं जालपदीं नामाप्सरसं प्राहिणोत्॥ स च तां दृष्ट्वा निर्विकल्पो मैथुनायोपायं स्खलि
७५

अर्जमेरद्रगोते षोपंचावाइति विश्रुताः॥ मुद्गलस्य च दायादो मुद्गलः सुमहायशाः॥ सर्व एते महात्मानः क्षत्रोपेता द्विजातयः॥
एते ह्यंगिरसः पुत्राः संश्रिताः काण्वमुद्गलाः॥ मुद्गलस्य सुतो ज्येष्ठो ब्रह्मर्षिः सुमहायशाः॥ इंद्रसेना यतो गर्भं वध्र्यश्वं प्रत्यपद्यत॥
वध्र्यश्वान्मिथुनं जज्ञे मेनकायामिति श्रुतिः॥ दिवोदासश्च राजर्षिरहल्या च यशस्विनी॥ शरद्वतस्य दायादमहल्या समसूयत
शतानंदमृषिश्रेष्ठं तस्यापि सुमहायशाः॥ पुत्रः सत्यधृतिर्नाम धनुर्वेदस्य पारगः॥ तस्य सत्यधृते रेतो दृष्ट्वाप्सरसमग्रतः॥
अवस्कन्नं शरस्तंबे मिथुनं समपद्यत॥ कृपया तच्च जग्राह शंतनुर्मृगयां गतः॥ कृपः स्मृतः स वै तस्माद्गौतमी च तथा कृपी॥ राम०
एते शारद्वताः प्रोक्ता एते ते गौतमाः स्मृताः॥ अत ऊर्ध्वं प्रवक्ष्यामि दिवोदासस्य संततिं॥ दिवोदासस्य दायादो ब्रह्मर्षिर्मित्रयुर्नृ ७५
पः॥ मैत्रेयोऽथ ततः सोमो मैत्रेयास्तु ततः स्मृताः॥ एते विपक्षताः पक्षाः क्षत्रोपेतास्तु भार्गवाः॥
ग्रयितु प्रवृत्तः सा च बाढंतरां॥
स्यादुद्राव॥ तामनुधावतो रेतः स्खलितं मिथुनमजनदिति॥ दिवोदासस्य पुत्रो तरमाह॥ अत ऊर्ध्वं प्रवक्ष्यामिति॥

बाह्याश्वस्य ज्येष्ठपुत्रः मुद्गलवंशमुक्त्वा द्वितीयपुत्रस्य संजयस्य वंशमाह॥ आसीत्पंचजनमाह॥ अजमीढपुनर्जातिः अजमीढात्पर
देवते॥ यस्य यज्ञे पशुत्वमापन्नस्य स्थाने पुत्रशतं पितुर्वने॥ शतं पुत्रास्तु दस्रपतेने वपस्तु नेष्ठलात्यवीयान्॥ कनीयान् इत्य

आसीत्पंचजनः पुत्रः संजयस्य महात्मनः॥ सुतः पंचजनस्यापि सोमदत्तो महीपतिः॥ सोमदत्तस्य दायादः सहदेवो महायशाः॥ स
हदेवसुतश्चापि सोमको नाम पार्थिवः॥ अजमीढः पुनर्जातः क्षीणे वंशे तु सोमकः॥ सोमकस्य सुतो जंतुर्यस्य पुत्रशतं बभौ॥
तेषां यवीयान्पृषतो द्रुपदस्य पिता प्रभुः॥ धृष्टद्युम्नः सुतस्तस्य धृष्टकेतुश्च तत्सुतः॥ अजमीढाः स्मृता ह्येते महात्मानस्तु सोमकाः॥
महिषी त्वजमीढस्य धूमिनी पुत्रगृद्धिनी॥ तृतीया तस्य पुत्रस्य जननी पृथिवीपते॥ सा च पुत्रार्थिनी देवि व्रतचर्यासमन्विता॥
ततो वर्षायुतं तप्त्वा तपः परमदुश्चरं॥ हुत्वाग्निं विधिवत्पूता पवित्रमितभोजना॥ अग्निहोत्रकुशेष्वेव सुष्वाप जनमेजय॥ धू
मिन्या स तया देव्या त्वजमीढः समागतः॥ ऋक्षं सा जनयामास धूम्रवर्णं सुदर्शनं॥ ऋक्षात्संवरणो जज्ञे कुरुः संवरणात्तथा॥ य
प्रयागादतिक्रम्य कुरुक्षेत्रं चकार ह॥ कृष्ट्वा तु सुमहाभागो वर्षाणि सुबहून्यथा॥ कृष्यमाणे तथा शक्रो यत्रास्य वरदो बभौ॥
पुण्यं च रमणीयं च पुण्यकृद्भिर्निषेवितं॥ तस्यान्ववायः सुमहांस्तस्य नाम्ना तु कौरवाः॥ कुरोः पुत्राश्च चत्वारः सुधन्वा सुधनुस्तथा॥
परीक्षित्तु महाबाहुः प्रवरश्चारिमेजय॥
जमीढभार्याणां मध्ये॥ वह्न्यन्तामिमिति काम्यहोमस्यर्यपि धूम्रया॥ तदुक्तं कातीयगृह्यसूत्रे
पुमांसौ मित्रावरुणौ पुमांसावश्विनावुभौ पुमानिंद्रस्य सूर्यस्य पुमांसं वर्धतामपि पुनः स्वाहेति पूर्वं गर्भकामेति अरिमेजय

हरि॰ ७५

शत्रुकंपनः॥षट्पुत्रानेकंचपुत्रमितिसमगिरिकाश्वमराजन्तेजनयामासतत्रजायन्तिलायंवपुत्रान्जनयामास॥ब्रह्मशापेनमत्स्यीभू
तामितिविवेकः महारथादिविशेषणत्रयंबृहद्रथस्य॥प्रत्यग्रयोद्वितीयः॥कुशस्यविशेषणंमणिवाहनमिति॥नोक्तजनविमर्शस्य

सुधन्वनस्तुदायादःसुहोत्रोमतिमान्सुतः॥च्यवनस्यतुपुत्रस्तुराजाधर्मार्थकोविदः॥च्यवनात्कृतयज्ञस्तुदृष्ट्वायज्ञैःसधर्मवित्॥विश्रु
तंजनयामासपुत्रमिंद्रसखंनृपं॥विद्योपरिचरंवीरंवसुनाम्नांतरिक्षगं॥विद्योपरिचरान्जज्ञेगिरिकासप्तमानवान्॥महा
रथोमगधराड्विश्रुतोयोबृहद्रथः॥प्रत्यग्रहःकुशश्चैवयमाहुर्मणिवाहनं॥मारुतश्चयदुश्चैवमत्स्यकालीचसप्तमः॥बृह
द्रथस्यदायादःकुशाग्रोनामविश्रुतः॥कुशाग्रस्यात्मजोविद्वान्वृषभोनामवीर्यवान्॥ऋषभस्यापिदायादःपुष्पवान्नामवीर्यवा
न्॥दायादस्तस्यविक्रांतोराजासत्यहितःस्मृतः॥तस्यपुत्रस्यधर्मात्मानाम्नाऊर्जस्तुयज्ञवान्॥ऊर्जस्यसंभवःपुत्रोयस्ययज्ञेसर्व
र्यवान्॥सकलेद्वेसवेस्यातेजरयासंधितःसतु॥जरयासंधितोयस्माज्जरासंधस्ततःस्मृतः॥सर्वक्षत्रस्यजेतासौजरासंधोम
हाबलः॥जरासंधस्यपुत्रोवैसहदेवःप्रतापवान्॥सहदेवात्मजःश्रीमानुदापिःसुमहायशाः॥उदापिर्जनयामासपुत्रंपर
मधार्मिकं॥श्रुतसामेतिनामानंमगधान्योवसत्प्रभुः॥परिक्षितस्तुदायादोधार्मिकोजनमेजयः॥जनमेजयस्यदायादास्त्रयए
वमहारथाः॥जस्मोस्तुकथयिष्यामियत्रजातोसिपार्थिव॥जन्हुस्त्वजीजनत्पुत्रंसुरथंनामनृमिपं॥श्रुतसेनोग्रसेनोचभीम
सेनश्चनामतः॥एतेसर्वेमहाभागाविक्रांताबलशालिनः॥

कःकालीमश्वगंधयस्यसंभवस्यजरासंधःकल्यनेदानिप्रायेमेतत्॥बृहद्रथाक्तिनन्मःप्रागुक्तत्वात्परिक्षितःकुरोर्द्वितीयपुत्रस्य

राम॰ ७५

Dr. BHAU DAJI MEMORIAL

जनमेजयपुत्रौमणिमत्यांजातौप्रागुक्तौसोनौ॥द्वितीयपूर्वोक्तादन्यःकुरुपितामहादपरःसमवासमकगणासंवाद्यंसाम्यमित्यर्थः॥स
मकगणोसमरत्नानिसप्तमहारत्नानिति॥तथाहि॥गजवाजिरथास्त्रीषुनिधिमालांबरद्रुमाः॥शक्तिःपाशमणिच्छत्रविमानानिचतु

जनमेजयस्यपुत्रौतुसुरथोमतिमांस्तथा॥सुरथस्यतुविक्रांतःपुत्रोजज्ञेविदूरथः॥विदूरथस्यदायादऋक्षएवमहारथः॥द्वितीयस
वगोराजानाम्नातेनैवविश्रुतः॥द्वावृक्षौतववंशेस्मिन्द्वावेवचपरिक्षितौ॥भीमसेनास्त्रयोराजन्द्वौचापिजनमेजयौ॥ऋक्षस्य
चद्वितीयस्यभीमसेनोभवत्सुतः॥प्रतीपोभीमसेनात्तुप्रतीपस्यतुशंतनुः॥देवापिर्बाह्लिकश्चैवत्रयएवमहारथः॥शंतनोस
स्तवस्तेपयत्रजातोसिपार्थिवः॥बाह्लिकस्यतुराज्यंवैसप्तबाह्यंनरेश्वर॥बाह्लिकस्यसुतश्चैवसोमदत्तोमहायशाः॥जज्ञिरेसो
मदत्तात्तुभूरिर्भूरिश्रवाःशलः॥उपाध्यायस्तुदेवानांदेवापिरभवन्मुनिः॥च्यवनस्यकृतपुत्रइष्टस्यासीन्महात्मनः॥शंतनुस्त्व
वराजाकौरवाणांधुरंधरः॥शंतनोसंप्रवक्ष्यामियत्रजातोसिपार्थिव॥गांगंदेवव्रतंनामपुत्रंसोजनयत्प्रभुः॥सतुभीष्मइ
तिख्यातःपांडवानांपितामहः॥कालीविचित्रवीर्यंतुजनयामासभारत॥शंतनोर्दयितंपुत्रंधर्मात्मानमकल्मषं॥कृष्णद्वै
पायनश्चैवक्षेत्रेविचित्रवीर्यके॥धृतराष्ट्रंचपांडुंचविदुरंचाप्यजीजनत्॥धृतराष्ट्रस्यगांधार्यांपुत्रानुत्पादयच्छतं॥तेषांदु
र्योधनःश्रेष्ठःसर्वेषामेवसप्रभुः॥पांडोर्धनंजयःपुत्रःसौभद्रस्तस्यचात्मजः॥३॥

दशेति॥देवापिःशंतनुर्बाह्लिकेयोत्रातःच्य
वनस्यचगुपुत्रस्यपुत्रःकृतःसमर्पितःइष्टअभिलषितस्तेनैवगंगागंगायांभवंकालीगंधकालीतुशापाद्विचित्रगदीतु॥

सोमदत्तसुतायां जातः तुर्वसोर्ययातिपुत्रस्य॥ दुष्यंतोयपरः॥ ॥इतिद्वात्रिंशः॥ ॥

अभिमन्योः परिक्षित्तु पितात्तव जनेश्वर॥ एष ते पौरवो वंशो यत्र जातोसि पार्थिव॥ तुर्वसोश्च प्रवक्ष्यामि द्रुह्योश्चानोर्यदोस्तथा॥ तुर्वसो
स्य सुतो वह्निर्गोभानुस्तस्य चात्मजः॥ गोभानोस्तु सुतो राजन् मरुत्तश्चैव नृपतेः॥ मरुत्तस्यात्मजो राजंस्त्रिसानुरपराजितः॥ करंधम
स्तु त्रैसानो मरुत्तस्तस्य चात्मजः॥ अन्यस्त्वाविक्षितो राजा मरुत्तः कथितस्तव॥ अनपत्यो भवद्राजा यज्वा विपुलदक्षिणः॥ दुहिता
संमता नाम तस्यासीत् पृथिवीपते॥ दक्षिणार्थं तु सा दत्ता संवर्त्ताय महात्मने॥ दुःषंतं पौरवं चापि लभते पूर्वकल्मषं॥ एवं ययाति
शापेन जरासंक्रमणे तदा॥ पौरवं तु वंशो वंशं प्रविवेश नृपोत्तम॥ दुःषंतस्य तु दायादः करूत्थामः प्रजेश्वरः॥ करूत्थामादथा
क्रीड चत्वारस्तस्य चात्मजः॥ पांड्यश्च केरलश्चैव कोलश्चैव च पार्थिव॥ तेषां जनपदाः स्फीताः पांड्याश्चोलाः सकेरलाः॥ द्रुह्योश्च तनयो रा
जन् बभ्रुसेतुश्च पार्थिव॥ अंगारसेतुस्तत्पुत्रो मरुतां पतिरुच्यते॥ यौवनाश्वेन समरे कृच्छ्रेण निहतो बली॥ युद्धं सुमहदस्यासी
न्मासान्परिचतुर्दश॥ अंगारस्य तु दायादो गांधारो नाम पार्थिव॥ ख्यायते यस्य नाम्ना वै गांधारविषयो महान्॥ गांधारदेशजा
श्चैव तुरगा वाजिनां वराः॥ अनोस्तु पुत्रो धर्मोभूद्धृतस्तस्यात्मजोभवत्॥ घृतात्तु दुदुहो जज्ञे प्रचेतास्तस्य चात्मजः॥ प्रचेतसः
पुचेतास्तु कीर्तिता अनवो मम॥ यदोर्वंशं प्रवक्ष्यामि ज्येष्ठस्योत्तमतेजसः॥ विस्तरेणानुपूर्व्याच गदतो मे निबोध ने॥ ॥ इति खि
लेषु हरिवंशे पुरुवंशानुकीर्त्तनं॥ ॥

राम०
७६

अथ त्रिंशे यदोर्वंशो वर्ण्यते भगवत्कृतिः॥ प्रजावोत्तुङ्गवो यत्र कृतवीर्यसुतस्य च॥ ऋषिसंभवं चात्रेयं दत्तात्रेयमितस्त्यथा॥

वैशं०॥ बभूवुस्तु यदोः पुत्राः पंच देवसुतोपमाः॥ सहस्रदः पयोदश्च क्रोष्टा नीलोंजकस्तथा॥ सहस्रदस्य दायादाः पुत्रास्त्रयः परमधार्मिकाः
हैहयश्च हयश्चैव राजा वेणुहयस्तथा॥ हैहयस्याभवत्पुत्रो धर्मनेत्र इति श्रुतिः॥ धर्मनेत्रस्य कार्त्तस्तु साहंजस्तस्य चात्मजः॥ साहं
जनी नाम पुरी तेन राज्ञा निवेशिता॥ साहंजस्य तु दायादो महिष्मान्नाम पार्थिवः॥ माहिष्मती पुण्यदेशे पुरी येन विनिर्मिता॥ आ
सीन्महिष्मतः पुत्रो भद्रश्रेण्यः प्रतापवान्॥ भद्रश्रेण्यस्य दायादो दुर्दमो नाम विश्रुतः॥ दुर्दमस्य सुतो धीमान् कनको नाम नामतः॥
कनकस्य तु दायादाश्चत्वारो लोकविश्रुताः॥ कृतवीर्यः कृतौजाश्च कृतवर्मा तथैव च॥ कृताग्निस्तु चतुर्थोभूत्कृतवीर्याद्यथार्जुनः॥
यः स बाहुसहस्रेण सप्तद्वीपेश्वरोभवत्॥ जिगाय पृथिवीमेको रथेनादित्यवर्चसा॥ स हि वर्षायुतं तप्त्वा तपः परमदुश्चरं॥ दत्तमा
राधयामास कार्त्तवीर्योत्रिसंभवं॥ तस्मै दत्तो वरान्प्रादाच्चतुरो भूरितेजसः॥ पूर्वं बाहुसहस्रं तु प्रार्थितं सुमहद्वरं॥ अधर्मे धीय
मानस्य सद्भिस्तत्र निवारणं॥ स सर्वरत्नभाक् सम्राट् चक्रवर्ती बभूव ह॥ सरावपत्तपाजोभूत्क्षेत्रपानस्तथैव च॥ सराब्दद्वाप
ऊर्मियो योगिनाम् अर्जुनोभवत्॥ स वै बाहुसहस्रेण यापातकठिनेव च॥ जाते रश्मिसहस्रेण सासारीरं द्विदवाकं॥ उग्रेण पृथिवीं
जिता धर्मेणोवानुरंजनं॥ संग्रामास्तु बहुजिता हत्वा वारीन् सहस्रशः॥ संग्रामे वर्त्तमानस्य वधं चाभ्यधिवाद्वणो॥ तस्य बाहुसह
स्रं तु युध्यतः किल भारत॥ योगयोगेश्वरस्येव प्रादुर्भवति मायया॥ तेनेयं पृथिवी सर्वा सप्तद्वीपा सपत्तना॥

हरि·
३३

वदीदासोगंधर्वमुख्यस्तस्यात्मजःपुत्रःउपवर्हणापरपर्यायः तस्यकार्त्तवीर्यस्य॥इतिर्युगपत्रंपदस्त्रंपतेयोगितियोजनायतःपाजसं

सप्तसमुद्रासनगराखड्गेनविधिनाजिता॥तेनसप्तसमुद्द्वीपेषुयज्ञशतशतानिवै॥प्राप्तानिविधिनाराज्ञाश्रूयतेजनमेजयः॥ सर्वे
यज्ञामहाबाहोसहस्रशतदक्षिणा॥सर्वेकांचनयूपाश्चसर्वेकांचनवेदयः॥सर्वेदेवैर्महाराजविमानस्थैरलंकृतः॥गंधर्वै
रप्सरोभिश्चनित्यमेवोपशोभिता॥यस्ययज्ञेजगौगाथांगंधर्वोनारदस्तथा॥ वरीदासात्मजोविद्वान्महिम्नातस्यविस्मितः॥
नारदउवाच॥ननूनंकार्त्तवीर्यस्यगतिंयास्यंतिपार्थिवाः॥यज्ञैर्दानैस्तपोभिर्वाविक्रमेणश्रुतेनच॥सहिसप्तसुद्वीपेषुचर्मीख
ड्गीशरासनी॥रथिद्वीपाननुचरन्योगीसंदृश्यतेनृपः॥अनष्टद्रव्यतेचैवनशोकोनचविभ्रमः॥प्रभावेनमहाराजोप्रजाधर्मे
णरक्षतः॥पंचाशीतिसहस्राणिवर्षाणांवैनराधिपः॥ससर्वरत्नभाक्सम्राट्चक्रवर्तीबभूवह॥सएवपशुपालोभूत्क्षेत्र
पालःसएवच॥सएववृष्ट्यापर्जन्योयोगित्वादर्जुनोभवत्॥सवैबाहुसहस्रेणज्याघातकठिनत्वचा॥भातिरश्मिसहस्रेण
शरदीवचभास्करः॥सहिनागान्मनुष्येषुमाहिष्मत्यांमहाद्युतिः॥कर्कोटकसुताञ्जित्वापुर्यांतस्यांनिवेशयत्॥सवैवेगंस राम·
मुद्रस्यप्रावृट्कालेभुजेनवै॥क्रीडन्निवभुजोद्भिन्नंप्रतिस्रोतश्चकारसः॥ ३३

ततानुष्ठानेनयज्ञप्रवर्तकः क्षेत्रपालः क्षेत्रस्यदेवयजनस्यपालकः संस्कारेण वृष्ट्या आकृतिपरिणामरूपया पर्जन्यः सर्वधोनोत
रकः

लुंठिताक्रीडतातेनफेनस्रग्दाममालिनी॥चलदूर्मिसहस्रेणशंकिताभ्येतिनर्मदा॥तस्यबाहुसहस्रेणक्षोभ्यमाणेमहोदधौ॥
भवंत्यलीनानिर्लीनाःपातालस्थामहासुराः॥चूर्णीकृतमहावीचिंचलन्मीनमहातिमिं॥मारुताविद्धफेनौघमावर्तक्षोभसंकुलं॥
प्रावर्तयत्तदाराजासहस्रेणचबाहुना॥देवासुरसमाक्षिप्तःक्षीरोदमिवमंदरः॥मंदरक्षोभचकिताअमृतोत्पादशंकिता
सहसोत्पतिताभीमाभीमंदृष्ट्वानृपोत्तमं॥नतानिश्चलमूर्धानोबभूवुस्तेमहोरगाः॥सायाह्नेकदलीखंडेकंपितास्तंभवायु
ना॥सवैबद्ध्वाधनुर्ज्याभिरुत्सिक्तंपंचभिःशरैः॥लंकेशंमोहयित्वातुसबलंरावणंबलात्॥निर्जित्यवशमानीयमाहिष्मत्यां
बबंधतं॥श्रुत्वातुबद्धंपौलस्त्यंरावणंत्वर्जुनेनतु॥ततोगत्वापुलस्त्यस्तमर्जुनंददृशेस्वयं॥मुमोचरक्षःपौलस्त्यंपुलस्त्येना
नुयाचितः॥यस्यबाहुसहस्रस्यबभूवज्यातलस्वनः॥युगांतेत्वंबुदस्येवस्फुटतोह्यशनेरिव॥अहोबतमृधेवीर्यंभार्गवस्य
यदच्छिनत्॥राज्ञोबाहुसहस्रंतुहैमंतालवनंयथा॥तृषितेनकदाचित्सभिक्षितश्चित्रभानुना॥सभिक्षामददद्वीरःसप्तद्वीपान्वि
भावसोः॥पुराणिग्रामघोषांश्चविषयांश्चैवसर्वशः॥जज्वालतस्यसर्वाणिचित्रभानुर्दिधक्षया॥सतस्यपुरुषेंद्रस्यप्रभावेण
महात्मनः॥ददाहकार्त्तवीर्यस्यशैलांश्चैववनानिच॥सशून्यमाश्रमंरम्यंवरुणस्यात्मजस्यवै॥ददाहबलवद्भीतश्चित्रभानु
सहैहयः॥यंलेभेवरुणःपुत्रंपुराभास्वंतमुत्तमं॥वसिष्ठंनामसमुनिःख्यातआपवइत्युत॥यत्रापवस्तुतंक्रोधाच्छप्तवान
र्जुनंविभुः॥यस्मान्नवर्जितमिदंवनंतेममहैहय॥ ७॥ विभावसोः श्लो॥

हरि॰ ७८

यत्र यस्यां निशायां शापवोवसिष्ठः। कर्मविजयद्रूपे स्वयमेव वधिष्यतः दत्तात्रेयादिति शेषः॥ धृष्ट इत्युक्तो धृष्टोक्तः यथ यद्धजस्यावंत

तस्मान्नैतद्दुष्करं कर्म कृतमन्यो हरिष्यति॥ रामो नाम महाबाहुर्जामदग्न्यः प्रतापवान्॥ छित्वा बाहुसहस्रं वै प्रमथ्य तरसा बली॥
तपस्वी ब्राह्मणश्च त्वां वधिष्यति स भार्गवः॥ अनष्टद्रव्यता यस्य बभूवामित्रकर्शन॥ वैशं॰॥ प्रभावेण नरेंद्रस्य प्रजा धर्मेण र
क्षतः॥ रामात्ततोस्य मृत्युर्वै तस्य शापान्महामुने॥ वरश्चैव हि कौरव्य स्वयमेव वृतः पुरा॥ तस्य पुत्रशतस्यासन्पंच शेषा महात्म
नः॥ कृतास्त्रा बलिनः शूरा धर्मात्मानो यशस्विनः॥ शूरसेनश्च शूरश्च धृष्टोक्तः कृष्ण एव च॥ जयध्वजश्च नामासीदावंत्यो नृपति
र्महान्॥ कार्तवीर्यस्य तनया वीर्यवंतो महाबलाः॥ जयध्वजस्य पुत्रस्तु तालजंघो महाबलः॥ तस्य पुत्राः शतं ख्यातास्तालजंघा इति
श्रुताः॥ तेषां कुले महाराज हैहयानां महात्मनां॥ वीतिहोत्राः सुजातास्ते भोजाश्चावंतयः स्मृताः॥ तौंडिकेराश्च विख्यातास्तालजंघास्त
थैव च॥ भरताश्च सुजाताश्च बहुत्वान्नानुकीर्तिताः॥ वृषप्रभृतयो राजन्यादवाः पुण्यकर्मणः॥ वृषो वंशधरस्तत्र तस्य पुत्रोऽभवन्म
धुः॥ मधोः पुत्रशतं त्वासीद्वृषणस्तस्य वंशकृत्॥ वृषणाद्वृष्णयः सर्वे मधोस्तु माधवाः स्मृताः॥ यादवा यदुनाम्नाग्रे निरुच्यंते च
हैहयाः॥ शूराश्च शूरवीराश्च शूरसेनास्तथानघाः॥ शूरसेन इति ख्यातस्तस्य देशो महात्मनः॥ अनष्टद्रव्यता चैव तस्य राज्ञो बभूव
ह॥ प्रत्ययेन नरेंद्रस्य प्रजाधर्मेण शाश्वतः॥ न तस्य वित्तनाशः स्यान्नष्टं प्रतिलभेत च॥

इति विशेषणं पुण्यकर्मणः पुण्यकर्मणः अग्रे प्रथमतः॥ २

राम॰ ७८

रूवानि दृष्ट्वा मादीनि॥ यथा प्राणिनः स्थावरजंगमान् धारयंतीति तद्वत्॥ पंचानां आत्मजानां देहनवानां इंद्रियाणां वंशानियंताः॥ त्रयस्त्रिं

कार्तवीर्यस्य यो जन्म कथयेदिह नित्यशः॥ एते ययातिपुत्राणां पंच वंशा विशांपते॥ कीर्तिता लोकवीराणां ये लोकान्धारयन्ति वै॥
भूतानीव महाराज पंच स्थावरजंगमान्॥ श्रुत्वा पंच विसर्गांस्तु राजा धर्मार्थकोविदः॥ वशी भवति पंचानामात्मजानां जनेश्वरः॥
लभेत्पंच वरांश्चैव दुर्लभानिह लौकिकान्॥ आयुः कीर्तिं यथा पुत्रानैश्वर्यं भूतिमेव च॥ धारणाच्छ्रवणाच्चैव पंचवर्गस्य भारत॥
क्रोष्टोस्तु शृणु राजेंद्र वंशमुत्तमपौरुषं॥ यदोर्वंशधरस्याथ यज्वानं पुण्यकर्मणः॥ क्रोष्टोर्वंशं हि श्रुत्वेमं सर्वपापैः प्रमुच्यते॥
यस्यान्ववाय जो विष्णुर्हरिर्वृष्णिकुलोद्वहः॥ ॥ इति खिलेषु हरिवंशे माथुरे॥ वैशं॰॥ गांधारी चैव माद्री च क्रोष्टोर्भार्ये बभूवतुः
गांधारी जनयामास अनमित्रं महाबलं॥ माद्री युधाजितं पुत्रं ततो न्यं देवमीढुषं॥ तेषां वंशस्त्रिधा भूतो वृष्णीनां कुलवर्द्ध
नः॥ माद्र्याः पुत्रौ तु जज्ञाते सुतौ वृष्ण्यंधकावुभौ॥ जज्ञाते तनयौ वृष्णेः श्वफल्कश्चित्रकस्तथा॥ श्वफल्कस्तु महाराज धर्मात्मा यत्र
वर्तते॥ नास्ति व्याधिभयं तत्र नावर्षभयमप्युत॥ कदाचित्काशिराजस्य विषये भरतसत्तम॥ त्रीणि वर्षाणि विषये नावर्षत्पाक
शासनः॥ स तत्र वासयामास श्वफल्कं परमार्चितं॥ श्वफल्कपरिवर्तेन ववर्ष हरिवाहनः॥ श्वफल्कः काशिराजस्य सुतां भा
र्यामविंदत॥ गांदिनी नाम सा गां तु ददौ विप्रेषु नित्यशः॥

शः चतुस्त्रिंशेऽध्याये क्रोष्टोर्वंशोऽनुवर्ण्यते॥ अवतीर्णो हरिर्यत्र कृ
ष्णकारणमानुषः॥ माद्रीपुत्रस्य युधाजितः विषये देशे श्वफल्कपरिवर्तेन आगमनमात्रेण हरिवाहन इंद्रः॥

हरि॰ उपासंगादयोः क्रूरभ्रातरः चित्रकस्याकुरभ्रातुः ॥ क्रोष्टसतायतापुत्रो देवमीढुषः ॥ शूरं दत्तसकारं शूरसेनात्कार्तवीर्यपुत्रादन्यः यशि
१५ रेजाताः प्राणादेनं स्वयमेव वशाह चक्रुः तत्र भाविभगवदवतारत्वात् आनकानां पटहानां देवभागादयो दश वसुदेवभ्रातरो गंडू

दातायज्ञाच वीरस्य सुतवानतिथिप्रियः ॥ अक्रूरस्तु पुरेवतस्मात् पुफल्कात् सूरिदक्षिणः ॥ उपमद्गुस्तथा मद्गुर्मृदरश्चारिमेजयः ॥
अविक्षिपस्तथोपेक्षः शत्रुघ्नो थारिमर्दनः ॥ धर्मधृग्यतिधर्मा च गृध्रमोजोंतकस्तथा ॥ आवाहप्रतिवाहौ च सुंदरी च वरांगनाः
अक्रूरेणोग्रसेनायां सुगात्र्यां कुरुनंदनः ॥ प्रसेनस्योपदेवश्च यज्ञाते देववर्चसौ ॥ चित्रकस्याभवन् पुत्राः पृथुर्विपृथुरेव च ॥
अश्वग्रीवोऽश्वबाहुश्च सुपार्श्वकगवेषणौ ॥ अरिष्टनेमिरश्वस्य सुधर्मा धर्मभृत्तथा ॥ सुबाहुर्बहुबाहुश्च श्रविष्ठाश्रवणे स्त्रि
यः ॥ अश्मक्यां जनयामास शूरं वै देवमीढुषः ॥ महिष्यां जज्ञिरे शूरा भोज्यायां पुरुषा दश ॥ वसुदेवो महाबाहुः पूर्वमानकदुंदुभिः
जज्ञे तस्य प्रसूतस्य दुंदुभ्यः प्राणदन् दिवि ॥ आनकानां च संह्रादः सुमहानभवद्दिवि ॥ पपात पुष्पवर्षं च शूरस्य भवने महत् ॥
मनुष्यलोके कृत्स्नेऽपि रूपे नास्ति समो भुवि ॥ यस्यासीत् पुरुषाग्र्यस्य कांतिश्चंद्रमसो यथा ॥ अनदेवभागस्ततो तथा देवश्रवाः पु राम॰
नः ॥ अनाधृष्टिः कनवको वत्सवानथ गृंजिमः ॥ श्यामस्य मीको गंडूषः पंच चास्य वरांगनाः ॥ पृथुकीर्तिः पृथा चैव श्रुतदेवा १५
श्रुतश्रवा ॥ राजाधिदेवी च तथा पंचैता वीरमातरः ॥ कुंतस्य श्रुतदेवायामगणुश्रुवे सुतः ॥ व ॥

पांताः जज्ञे इति सर्वत्र संबध्यते ॥ अस्य शूरस्य वरांगनाउत्तमस्त्रियः पुत्रा जज्ञिर इति शेषः ॥

वेयस्य रमणोऽथ स्य पृथां कुंतीं कुंतिभोजः शूरं प्रार्थयित्वा दुहितरं चक्रे ॥ ततो युधिष्ठिरादनंतरं कुंत्यामेवाभ्यनमितात् क्रोष्टुपुत्राद्धृष्टिनंदना
त्यादवमानस्यादेषाप्रजतीन् ॥ ह्रादकतात् देवभागस्य वसुदेवभ्रातुः अनाधृष्टिर्वसुदेवस्यैव भ्राता चतुर्थः ॥ निहत्यशत्रुं ऋप

श्रुतश्रवायां चैद्यस्य शिशुपालो महाबलः ॥ हिरण्यकशिपुर्योऽसौ दैत्यराजोऽभवत्पुरा ॥ पृथुकीर्त्यां तु संजज्ञे तनयो वृद्धशर्मणः ॥ कु त
रूषाधिपतिर्वीरो दंतवक्त्रो महाबलः ॥ पृथां दुहितरं चक्रे कुंतिस्तां पांडुरावहत् ॥ यस्यां स धर्मविद्राजा धर्माज्जज्ञे युधिष्ठिरः ॥
भीमसेनस्तथा वातादिंद्राच्चैव धनंजयः ॥ लोके प्रतिरथो वीरः शक्रतुल्यपराक्रमः ॥ अनमित्राच्छिनिर्जज्ञे कनिष्ठाद्वृष्णिनंदना
त् ॥ शैनेयः सात्यकिस्तस्माद्युयुधानश्च सात्यकिः ॥ उद्धवो देवभागस्य महाभागः सुतोऽभवत् ॥ पंडितानां परं प्राहुर्देवश्रवसमुद्भ
वं ॥ अश्मक्यां प्राप्तवान् पुत्रमनाधृष्टिर्यशस्विनं ॥ निवृत्तशत्रुं शत्रुघ्नं श्रुतदेवाऽभ्यजायत ॥ श्रुतदेवात्मजास्ते तु नैषादिर्यः परि
श्रुतः ॥ एकलव्यो महाराज निषादैः परिवर्धितः ॥ वत्सायते त्वपुत्राय वसुदेवः प्रतापवान् ॥ अद्भिर्ददौ सुतं वीरं शौरिः कौशिकमौ
रसं ॥ गंडूषाय त्वपुत्राय विष्वक्सेनो ददौ सुतान् ॥ चारुदेष्णं सुचारुं च पंचालं कृतलक्षणं ॥ असंग्रामेण यो वीरो नावर्तत कदा
चन ॥ रौक्मिणेयो महाबाहुः कनीयान् भरतर्षभ ॥

वत्सां प्राप्तवानिति संबंधः देवश्रवा वासुदेवस्य हतीयो भ्राता शत्रुघ्नं पुत्रं
जायते स्म ॥ वत्सावद्गंडूषो वसुदेवानुजो विष्वक्सेनः सर्वव्यापकः श्रीकृष्णः सुतान् चारु ॥

हरि. ८०

योवारश्चाकदेसः रौक्मिण्योरुक्मिण्यांश्रीकृष्णाज्जातः कनवकोवसुदेवभ्राता तस्यवीरौ विक्रांतौ ॥ श्रावगंजिमौ श्रवगंजिमस्य वसुदे
वभ्रातुः पुत्रौ शमश्शमीको वसुदेवस्यैवभ्रातरौ ॥ ॥ इति चतुस्त्रिंशः ॥ पंचत्रिंशे हरेः प्रोक्तः प्रादुर्भाविपरात्मनः ॥ गार्ग्यशापानुरो

धायसानीसहस्राणि यंयौ तं दृष्ट्वोत्र पुः ॥ वाक्ष्नाद्योपनो ह्यामश्चाक्ष देह्यं हतानिति ॥ तं त्रिजन्मन्त्रिपासश्च सुतो कनवकस्यतु ॥
वारस्याश्च हनुश्चैव वीरौ तावथगंजिमौ ॥ शमश्च पुत्रः शमीकस्तु शमीको राज्यमावहत ॥ जुगुप्समानो भोजत्वराजसूयमवाप
सः ॥ अजातशत्रुः शत्रूणां जज्ञे तस्य विनाशनः ॥ वसुदेवसुतान्वीरान्कीर्तयिष्यामि तच्छृणु ॥ वृष्णेस्त्रिविधमेतत्तु बहुशाखं म
होजसं ॥ धारयन्विपुलं वंशं नानर्थैरिह युज्यते ॥ इति खिलेषु हरिवंशे वृष्णिकीर्तनं ॥ वंशः ॥ याः पत्न्यो वसुदेवस्य चतुर्दश
वरांगनाः ॥ पौरवी रोहिणी नाम मदिरा पिवथावरा ॥ वैशाखी च तथा भद्रा सुनाम्नी चैव पंचमी ॥ सहदेवा शांतिदेवा श्रीदेवा दे
वरक्षिता ॥ वृकदेव्युपदेवा च देवकी चैव सप्तमी ॥ सुतनु वडवा चैव द्वे एते परिचारिके ॥ पौरवी रोहिणी नाम बाल्हीकस्या
भ्रजाभवत् ॥ ज्येष्ठा पत्नी महाराजन्दयितानकदुंदुभेः ॥ लेभे ज्येष्ठं सुतं रामं शारणमेव च दुर्दमं ॥ दुर्दमं दमनं शुभ्रं पिंडारकमुशीनरं ॥

धेनपवनाड्यतदथा ॥ पौरवी रोहिणी बाह्लिकस्य विशेषणं तां सा बाल्हीकपुत्री तात मदिरा विशाख्येरोहिण्या अनुजेः सहदेवाप्र
मुखाः सप्त देवकस्य पुत्र्यः तत एवोक्तं देवकी चैव सप्तमीति सुतनुर्वडवे कनीष्ठ भार्यास्तत एवोक्तं परिचारिकेति ॥

राम. ८०

अक्रूरस्य पूर्वोक्तार्यां सुगान्धी पूर्वोक्तांतरमाह ॥ अनिमनुमित्रतादक्रूरादिति ॥ अथयदूनां मथुरात्यागे कारणप्रसंगमाह ॥ कन्यात्रि
गर्त्तराजस्येति ॥ कन्येत्यत्र सुपांसुलुगिति षष्ठ्या लुक् ॥ आकारो वा तेन कन्यायाः त्रिगर्त्तराजस्य कृतलक्ष्मानिधस्य पुत्राः अत्र ष
ष्ठीस्थाने यमासुपांसुलुगित्यनेनैव भर्त्तुः गार्ग्यस्य पौरुषं पुंस्त्वे शिशिरायणः ॥ अगावहाय परपर्यायैः शाजो जिज्ञासां च के कि

चित्रासु नश्रेति पुनर्विख्याता कुरुनंदन ॥ वसुदेवाच्च देवक्यां यज्ञे शौरिर्महायशाः ॥ रामाच्च निशठो यज्ञे रेवत्यां दयितः सुतः ॥ सुभ
द्रायां रथी पार्थादभिमन्युरजायत ॥ अक्रूरात्काशिकन्यायां सत्यकेतुरजायत ॥ वसुदेवस्य भार्यासु महाभागासु सप्तसु ॥ ये
पुत्रा जज्ञिरे शूरा नामतस्तान्निबोध मे ॥ भोजश्च विजयश्चैव शांतिदेवा सुतावुभौ ॥ वृकदेवः सुनामायां गदश्चास्तां सुतावुभौ ॥
अगावहं महात्मानं वृकदेवी व्यजायत ॥ कन्यात्रिगर्त्तराजस्य भर्त्रार्थे शिशिरायणः ॥ जिज्ञासां पौरुषे चक्रे न चस्कंदे पौरुषं ॥
कृष्णायससमप्रख्यो वर्षे द्वादशमे तथा ॥ मिथ्याभिशप्तो गार्ग्यस्तु मन्युनाभिसमीरितः ॥ गोपकन्यामुपादाय मैथुनायोपचक्र
मे ॥ गोपाली त्वप्सरास्तस्य गोपस्त्री वेषधारिणी ॥ धारयामास गार्ग्यस्य गर्भं दुर्धरमच्युत ॥

मपयुमानुतनेति ॥ अथास्य पौरुषं न च स्कंदेन च गतवान् ॥ स्कंदिर्गति शोषणयोरिति धात्वर्थनात् ऊर्ध्वरेतस्त्वात् ततोनिकृष्टे गा
र्ग्यः कृष्णायसं कृष्णलोहचूर्णं भिन्नं तस्य तस्तेपरतिशेषः अयप्रख्यलोहवर्णद्वादशमे द्वादशवर्षे अभिशप्तोपह
सितः अतएव मन्युनाक्रोधेन अभिसमीरितः आकुलितः ॥

DR. BHAU DAJI

हरि० ८२

प्रसन्नाद्गुरुशिष्यादथवा नोऽश्ववध्यं नयावदा च पुत्रं प्रार्थयेतिशेषः मेथुनायोपचक्रम इति संबंधः तस्य यवनाधिपतेः प्रार्थयेति शेषः अप्सरा मेन
कास्यामानुष्यमानुष्यत्वमापन्नायां ॥ गार्ग्यभार्यायां शिशिरायणो गार्ग्यः भार्यविदुपस्थितत्वात् ॥ तथा च विष्णुपुराणे गार्ग्यं गोष्ठे द्विज
श्यालः षंड इत्युक्तवान्यदा ॥ यदुनां सन्निधौ सर्वे जहसुर्यदवास्तदा ॥ ततः कोपसमाविष्टो दक्षिणापथमेत्य च सुतमिच्छंस्तपास्तपे

मानुष्यं गार्ग्यभार्यायां नियोगाच्छूलपाणिनः ॥ स कालयवनो नाम यज्ञे राजा महाबलः ॥ वृषपूर्वार्द्धकायास्तमदहत्तांश्चिनोरणे ॥
अपुत्रस्य सराज्ञस्तु ववृधेंतःपुरे शिशुः ॥ यवनस्य महाराजः स कालयवनोऽभवत् ॥ स युद्धकामो नृपतिः पर्यपृच्छद्द्विजोत्तमः ॥ वृ
ष्णंधककुलं तस्य नारदोऽकथयद्विभुः ॥ अक्षौहिणीभिः सैन्यस्य मथुरामभ्यगात्तदा ॥ दूतं संप्रेषयामास वृष्ण्यंधकनिवेशने ॥ त
तो वृष्ण्यंधकाः कृष्णं पुरस्कृत्य महामतिं ॥ समेता मंत्रयामासुर्यवनस्य तदा भयात् ॥ कृत्वा च निश्चयं सर्वे पलायनमरोचयन् ॥
विहाय मथुरां रम्यां मानयंतः पिनाकिनं ॥ कुशस्थलीं द्वारवतीं निवेशयितुमीप्सवः ॥ इति कृष्णस्य जन्मेदं यः शुचिर्नियतेंद्रि
यः ॥ पर्वसु श्रावयेद्विद्वाननृणः स सुखी भवेत् ॥ ॥ इति खिलेषु हरिवंशे कृष्णजन्मानुकीर्त्तनं ॥ ३ ॥ श्लो० ॥२१

यदुपचक्रमयावदा ॥ आराधयन्महादेवं सोऽयश्चूर्णमभक्षयत् ॥ ददौ वरं च तुष्टोऽस्मै वर्षे द्वादशे शिवः ॥ संयोजयामास च तं यश्च
वनेशो ह्यनात्मजः ॥ तद्योषित्संगमाच्चाथ पुत्रोऽभूद्वृष्णिसप्रभुः ॥ तं कालयवनं नाम राज्ये स्वे यवनेश्वरः ॥ अभिषिच्य वनं यातो
वज्रायकविनोद्यः संमतुवीर्यमदोन्मत्तः पृथिवीं बलिनो नृपान् ॥ प्रपच्छ नारदं ॥ सोऽस्मै कथयामास यादवानिति ॥ इति पं
च ॥

राम० ८२

पद्विंशो वर्णनवृक्षोऽयं वंशः यदुसुतस्य च ॥ यत्र जाता महाजन्ती रुक्मिणी शक्तिरीश्वरी ॥ प्रसवो नरमाहात्क्रोष्टुरेवानवत्सु त्र इति सुतप्रसू
तिपुत्रजन्मतथायथ्यं श्रेष्ठमेवात्मज ॥ मिछन रज्जेभि संबंध कर्मभिः वेदोक्तक्रियाभिरनुष्ठितः ॥ पार्थश्रवसः पृथुश्रवाः पुत्रं अंतरअंतरन

वैशंपायन उ ॥ क्रोष्टुरेवानवत्पुत्रो वृजिनीवान्महायशाः ॥ वृजिनीवतो नव पुत्रो स्वाहः स्वाहकृतावरः ॥ स्वाहिपुत्रोऽभवद्राजा उषङ्गु
र्वदतांवरः ॥ महाक्रतुभिरिजे यो विविधैर्भूरिदक्षिणैः ॥ ततः प्रसूतिमिच्छन्वै उषङ्गुर्मोधमात्मजं ॥ पत्ते चित्ररथस्तस्य पुत्रः कर्मभि
रन्वितः ॥ आसीच्चैत्ररथाद्वीरो जज्ञे विपुलदक्षिणः ॥ शशबिंदुः परं वृत्तो राजर्षीणामनुष्ठितः ॥ पृथुश्रवाः पृथुयशाः राजासीच्छशबिं
दवः ॥ सशांति च पुराणज्ञा पार्थश्रवसमंतरं ॥ अंतरस्य सुयज्ञस्तु सुयज्ञतनयोऽभवत् ॥ उषतो यतमः खिलं सुधर्मं सुषतांवरः ॥
शानेयुरभवत्पुत्र उषतः शत्रुतापनः ॥ मरुत्तस्तस्य तनयो राजर्षिरभवन्नृप ॥ मरुतो लभते ज्येष्ठं सुतं कंबलबर्हिषं ॥ च
चार विपुलं धर्ममर्मर्षात्सुपुण्यनागपि ॥ शावप्रसूतिमिच्छन्वै सुतं कंबलबर्हिते ॥ बभूव रुक्मकवचः शतः प्रसवतः सुतः ॥ निहा
त्य रुक्मकवचः शतं कवचिनां रणे ॥ धन्विनां निशितैर्बाणैरवाप श्रियमुत्तमां ॥ जज्ञेऽथ रुक्मकवचात्पराजित्परवीरहा ॥ जज्ञिरे प
च पुत्रास्तु महावीर्याः पराजितः ॥ रुक्मेषुः पृथुरुक्मस्य ज्यामघः पालितो हरिः ॥ मानं ॥ स वयसेनवा खिलश्च धर्ममुत्रातां का
मयमानानथ्यधिवरश्रेष्ठायाद्यत्तु कस्य पर्षा ॥ सच कंबलबर्हिश्चेन्नागपि जितं स्वर्गोपि कंबलबर्हिरभवत ॥

हरि०
८२

अनयत्याउःखात्सदनानशतप्रसूतिं बहुप्रसवं सूतमिच्छन् विपुलेधर्मविचारे त्यन्वयः तस्य च कंबलबर्हिषः शतप्रसवाप्य पुत्रो
भूदिति शेषः तस्माच्च शतशः प्रसवतः रुक्मकवचे च सूतो बभूवेति संबंधः रुक्मेषु बाणा प्राणा अनवत्संश्रितः रुक्मेषुमाश्रितः प्र-

पालितश्च हरिश्चैव विदेहेऽस्य पिता ददौ॥ रुक्मेषुरभवद्राजा पृथुरुक्मस्य संश्रयात्॥ ताभ्यां प्रव्राजितो राजा ज्यामघोऽवसदाश्रमे
प्रशांतश्चाप्रशांतश्च ब्राह्मणैश्चावबोधितः॥ जगाम धनुरादाय देशमन्यं ध्वजी रथी॥ नर्मदाकूलमेकाकी नगरीं मृत्तिकावतीं
ऋक्षवंतं गिरिं जित्वा शुक्तिमत्यामुवास सः॥ ज्यामघस्याभवद्भार्या शैब्या बलवती सदा॥ अपुत्रोऽपि च राजा स नान्यां भार्यामविंद-
त॥ तस्यासीद्विजयो युद्धे तत्र कन्यामवाप सः॥ भार्यामुवाच संत्रस्तः स्नुषेति स नरेश्वरः॥ एतच्छ्रुत्वाब्रवीद्देवी कस्य चेयं स्नुषेति वै
अब्रवीत्तदुपश्रुत्य ज्यामघो राजसत्तमः॥ यस्ते जनिष्यते पुत्रस्तस्य भार्यायिदानवी॥ उग्रेण तपसा तस्याः कन्यायाः सा व्यजाय-
त॥ पुत्रं विदर्भं सुभगा शैब्या परिणता सती॥ राजपुत्र्यां तु विद्वांसौ स्नुषायां क्रथकैशिकौ॥ पश्चाद्विदर्भो जनयच्छूरौ रणवि-
शारदौ॥ भीमो विदर्भस्य सुतः कुंतिस्तस्यात्मजोऽभवत्॥ कुंतेस्तस्य सुतो जज्ञे रणधृष्टः प्रतापवान्॥ धृष्टस्य जज्ञिरे शूरा-
स्त्रयः परमधार्मिकाः॥ आवंतश्च दशार्हश्च बलि विषहरश्च ह॥ ३॥

व्राजितः राज्यान्निष्कासितः आश्रमे वानप्रस्थसमीपे प्रशांतः वार्धक्यं प्राप्तः प्रतिबोधितः कृतोपदेशः विगाय जितवान् बलवती प्रगल्भा॥

राम०
८२

पुरुषोत्तम इति पुरुद्वसो विशेषणं तस्य वैदर्भी भद्रवती नाम्नी ति द्वितीयार्थे आम्नातं मधुः पिता मह मनाम्ना इति इतिशब्दः॥ सप्तविंशे
वयश्लोके चत्वारः सत्वतः सुताः स्वीकरात् हरीत्यात्मतया गणं वंशवर्णपं सात्वतान् सत्वतः पुत्रान् भजिनं भजनशीलं मिति भजमान

दशार्हस्य सुतो व्योमो व्योमाज्जीमूत उच्यते॥ जीमूतपुत्रो विकृतिस्तस्य भीमरथः सुतः॥ अथ भीमरथस्यासीत्पुत्रो नवरथस्तथा॥
तस्य चासीद्दशरथः शकुनिस्तस्य चात्मजः॥ तस्मात्करंभः कारंभिर्देवरातोऽभवन्नृपः॥ देवक्षत्रोऽभवत्तस्माद्देवक्षत्रसुतो यशाः॥
देवगर्भसमो यते स्तेत्रे ते चस्य नंदनः॥ मधूनां वंशकृद्राजा मधुर्मधुरवागपि॥ मधोर्जज्ञे तु वैदर्भ्यां पुरुद्वान्पुरुषोत्तमः॥ मधु-
र्जज्ञे च वैदर्भ्यां भद्रवत्यां कुरूद्वह॥ ऐक्ष्वाकी चाभवद्भार्या सत्वतस्तस्य जायत॥ सत्त्वात्सर्वगुणोपेतः सात्वतां कीर्तिवर्द्धनः॥ इमं
विसृष्टिं विपुलां यज्ञानामुग्रस्य महात्मनः॥ प्रजावान्परमप्रीत्या प्रजापतिर्भवेत्तथा॥ इति खिलेषु हरिवंशे ज्यामघसृष्टिः॥ वंशः॥
सात्वतान्सत्वसंपन्नान्कौसल्या सुषुवे सुतान्॥ भजिनं भजमानं च दिव्यं देवावृधं नृपः॥ अंधकं च महाबाहुं वृष्णिं च यदु-
नंदनं॥ तेषां विसर्गाश्चत्वारो विस्तरेणेह तान् शृणु॥ भजमानस्य सृंजय्यो बाह्यकाथोपबाह्यक॥ आस्तां भार्ये तयोस्तस्माज्जज्ञि-
रे बहवः सुताः॥ क्रिमिश्च क्रमणश्चैव धृष्टः शूरः पुरंजयः॥ एते बाह्यकसृंजय्यां भजमानाद्विजज्ञिरे॥

विशेषणादर्शनैर्व्यंग्यं कोकिकमिति देवावृधस्य सृंजय्यो भजमानयापुत्रौ॥ बहवः अन्ये अन्यमानं संयुक्तमेनः समाधाय॥

हरि° ८३

स्पृशन्तपस्येपृ इत्यनेन संबंधः स्पृशनिं चस्वतोद्युपलक्षणम्॥ कामुख्याद्दंतोतिमानुरागविचारः सहव्रतापली॥ इयेष हेच्छत्पद्यधि
कसमसहस्राणि॥ उनयोरप्युपदेशादित्यर्थः॥ अंधकात्सत्वतपुत्रात्॥ काशस्यदुहिता स्वसुर्दुहिता॥ न चात्रैकगोत्रताशंकनीयान्त

अयुताजिशपदस्ताजिछताजिघाथदासकः॥ उपबाह्यकसंजप्यां नजमानाद्विजज्ञिरे॥ यज्वा देवावृधो राजा विचारविपुलं नपः॥
पुत्रं सर्वगुणोपेतं मम स्यादिति निश्चयः॥ संयुज्यात्मानमेवं तु पर्णाशाया जलं स्पृशन्॥ सदोपस्पृशतस्तस्य चकार प्रियमापगा
॥ चिंतयाभिपरिता साजगाम कलिनिश्चयः॥ कल्याणत्वान्नरपतेस्तस्य सा निम्नगोत्तमा॥ नाध्यगच्छत्तु तारी त्वां यस्यामेवं विधिसु
तः॥ जायेतस्मात्स्वयं गत्वा जवाप्यस्य सहव्रतः॥ अथ भूत्वा कुमारी सा बिभ्रती परमं वपुः॥ वारयामास नृपतिं तामियेष स च प्रभु
तस्यामाधत्त गर्भं च तेजस्विनमुदारधीः॥ अथ वा दशमे मासि सुषुवे सरितां वरा॥ पुत्रं सर्वगुणोपेतं बभ्रुं देवावृधान्नृपः॥ अ
नुवंशे पुराणज्ञा गायंतीति परिश्रुतम्॥ गुणान्देवावृधस्यापि कीर्तयंतो महात्मनः॥ यथैवाग्रे तथा दूरात्पश्यामस्तथांतिकात्
बभ्रुः श्रेष्ठो मनुष्याणां देवैर्देवावृधः समः॥ एते मतत्वसंप्राप्ताव बभ्रोर्देवावृधादपि॥ यज्वा देवान् पतिर्दृष्टान् ब्रह्मण्यः सुदृढायुधः राम° ८३
तस्यान्ववाये सुमहान् भोजये मार्त्तिकावताः॥ अंधकात्काश्यदुहिता चतुरो लभतात्मजान्॥ कुकुरं भजमानं च समकं बलब
र्हिषं॥ कुकुरस्य सुतो धृष्णुर्धृष्णोस्तु तनयस्तथा॥

त्रियाणोपुरोहितनेदेनणोत्र भेदात्॥ श्वेतेनस्तूत्रेण स्तुहेन वा॥ किमोरप्रतिमः तरुण अवदुज्ञाहवानित्यर्थः॥

॥ अशीतिवर्मणा युक्त अनेय न्वचाउकावर्मणेति पाठे युगमोर्थः॥ पूह्णामतुत्रोपछ्छांदसः॥ कवचनवरूथनस्थाने अशीत्या वर्मवत्रिः फल
कडैर्स्यैर्हत॥ तदुक्तं ब्रह्मांडे आहुकप्रथमयात्यशीत्या लकपेणि निरिति॥ भोजमाहुकं तोजस्यैवाहुकस्यगच्छतः॥ पूर्वस्यां दिशि नाग
तो सहस्राणि दशापि दैन्यग्निमेणमबधे॥ अमात्या त्वातापये त्वितिशेष इत्येवं भोजस्याहुकस्यानुमोदनमत्यनुतानं सोपासगेस्या
दिरथविशेषणानि तत्रोपासंगो युगा अनुकर्षयोयोक्ता॥ अवदूनुकर्षणात्॥ अधस्तनकाष्ठमवरूथोरथगुप्तिः॥ सूष्यादिमय्यः कन्या॥

केपोनरोमा त्वस्याथ तेतिरिस्तुनयो भवत्॥ पुनर्वसुत्पादनिजिघपुनर्वसो॥ तस्यैव पुत्रमिथुनं बभूवानजितु किल॥ आ
हुकस्याहुकीचैव ख्यातौ मतिमतां वरे॥ इमो चोदाहरन्त्येते गाथा प्रति तमाहुकं॥ श्वेतेन परिवारेण कशिरो प्रतिमो महान्॥
अशीतिवर्मणा युक्तो नाहुकः प्रथम व्रजेत॥ नापुत्रको नृशांतदो नासहस्रशतायुषः॥ नाशुद्धकर्मा यज्वायो भोजमभितो व्रजे
त्॥ पूर्वस्यां दिशि नागानां भोजस्य प्रययुः किल॥ सोपासंगानुकर्षाणां ध्वजिनां सवरूथिनां॥ रथानां मेघघोषाणां सहस्राणि द
शैव तु॥ रूप्यकाचनकक्षाणां सहस्राण्येकविंशति॥ यावंत्येव सहस्राणि उत्तरस्यां तथा दिशि॥ आभूमिपालभोजास्वमा
निष्किकिंकिणीकिन॥ आहुकं चाप्यवंतिभ्यः स्वसारं ददुरंधकाः॥

शं रक्षायेखामिनिहस्त्रिविशेषणं चकारादिनरयोरपिदिश
श्वावंत्येवासहस्राणि वितेयं॥ आभूमिपालानां मेनरात्तौ निष्याप्पलिताञ्च्रस्थानस्वभूतानभोजात्यात्ताप्यर्यांतिमनुपगाकिं
भूतान्द्रुतस किंकर्याकिनः॥ किंकिणीकाः क्षुद्रघटिकाः॥ इहत्रमाः दाहोत्तीर्णसुवर्णनिमि॥ ति

किंकिणः संति येषु तान् अत्रदंत्यस्य मूर्द्धन्यत्वमर्मरियसोरथिष्ठूपवर्यदि॥ कुमार्य पुत्रः वृकदेवी मुक्ताउपदेवी तेसुनूमिवः कंसः॥ ९

आहुकस्य तु काश्यायां द्वौ पुत्रौ संबभूवतुः॥ देवकश्चोग्रसेनश्च देवगर्गसंबभूवतु॥ देवकस्याभवत्पुत्राश्चत्वारस्त्रिदशोपमः॥
देववानुपदेवश्च सुदेवो देवरक्षितः॥ कुमार्यः सप्त चास्यासन् वसुदेवाय ता ददौ॥ देवकी शांतिदेवा च सुदेवा देवरक्षिता॥
वृकदेव्युपदेवी च सुनाम्नी चैव सप्तमी॥ नवोग्रसेनस्य सुतास्तेषां कंसस्तु पूर्वजः॥ न्यग्रोधश्च सुनामा च कंकः शंकुश्च भूमिप
राष्ट्रपालोऽथ सुतनुरनाधृष्टिश्च पुष्टिमान्॥ तेषां स्वसारः पंचासन् कंसा कंसवती तथा॥ सुतनु राष्ट्रपाली च कंका चैव वरांगना॥
उग्रसेनः सहापत्यो व्याख्यातः कुकुरोद्भवः॥ कुकुराणामिमं वंशं प्रजावानाप्नुयान्नरः॥ ॥इति श्रीहरिवंशे॥ ॥वैशंप
भजमानस्य पुत्रोऽथ रथमुख्यो विदूरथः॥ राजाधिदेवः शूरस्तु विदूरथसुतोऽभवत्॥ राजाधिदेवस्य सुताः जज्ञिरे वीर्यवत्तराः॥
दत्तातिदत्तौ बलिनौ शोणाश्वः श्वेतवाहनः॥ शमी च दंडशर्मा च दत्तशत्रुश्च शत्रुजित्॥ श्रवणा च श्रविष्ठा च स्वसारौ संबभूवतुः॥
शमीपुत्रः प्रतिक्षत्रः प्रतिक्षत्रस्य चात्मजः॥ स्वयंभोजः स्वयंभोजाद्धृदिकः संबभूव ह॥ तस्य पुत्रा बभूवुर्हि सर्वे भीमपराक्रमाः॥
कृतवर्माग्रजस्तेषां शतधन्वा तु मध्यमः॥ देवांतश्च नरांतश्च भिषग्वैतरणश्च य॥ सुधितश्च सुधांतश्च कामः कामदंतकः॥
देवांतस्याभवत्पुत्रो विद्वान्कंबलबर्हिषः॥ ३॥

तिसप्तत्रिंशः॥ ॥अष्टत्रिंशोऽध्यायः प्रोक्तो भजनीतस्य तत्र च॥ स्यमंतकस्य च मणेः प्रत्यानयनमद्भुतं॥ अथ मुख्यो तिरथः॥

देवर्षेश्च वचनश्रावचनस्याश नधवतः निषक प्रन्नतयः चत्वारः पुत्रा बभूवुः कामदा कामदंतिके चद्वौ पुत्रौ॥ किंवलबर्हो लोमरुत पु
त्रस्य देववान्नाम पुत्रः प्रासीत्॥ तस्य देववृत्तनतयः पुत्रा बभूवुरित्याह॥ असमौजा इति प्रदत्र किंस्य कामदद्राविस्याकाहृत्यामध
कामयदस्य विशेषणं दधिकाएव दद्या वितिगम्यते॥ अनमित्रस्य वंशांतरमुक्तानुवादपूर्वकमाह॥ गांधारी चेत्यादिनि वसत्याक्त

असमौजा सुतस्तस्य नामासमौजाश्च नाबुभौ॥ अजात पुत्राय स्थतानमददामसमौजसे॥ सुदंष्ट्रश्च सुचारुश्च कृष्ण इत्यंधकास्मृता॥ गां
गांधारी चैव माद्री च क्रोष्टोर्भार्ये बभूवतुः॥ गांधारी जनयामास अनमित्रं महाबलं॥ माद्री युधाजितं पुत्रं ततो वै देवमीढुलं॥ अन
मित्रममित्राणां जेतारमपराजितं॥ अनमित्रसुतो निघ्नो निघ्नस्य द्वौ बभौवतुः॥ प्रसेनश्चाथ सत्राजित् शत्रुसेनाजितौ युतौ॥ प्रसे
नस्तु द्वारवत्यां तु निवसत्यां महामणिं॥ दिव्यं स्यमंतकं नाम समुद्रादुपलब्धवान्॥ तस्य सत्राजितः सूर्यः सखा प्राणसमोऽभवत्॥
स कदाचिन्निशापाये रथेन रथिनां वरः॥ तोयकूलमुपस्प्रष्टुमुपस्थानयौ रविः॥ तस्योपतिष्ठतः सूर्यं विवस्वानग्रतः स्थितः॥
अस्पष्टमूर्तिर्भगवान् तेजोमंडलवान्प्रभुः॥ अथ राजा विवस्वंतमुवाच स्थितमग्रतः॥ यथैव व्योम्नि पश्यामि सदा त्वां ज्योतिषांपते॥
तेजोमंडलिनं देवं तथैव पुरतः स्थितं॥ को विशेषोऽस्ति मे तत्र सख्येनोपगतस्य वै॥ एतच्छ्रुत्वा तु भगवान् मणिरत्नं स्यमंतकं॥

तनिवासायांस्यमंतकंलोहितवर्णमणिमसमुद्रासमुद्रतीरे तृष्णस्य वेरित्यर्थः॥ तदेवाह तस्य सत्राजितः इति निवासायापेक्षा प्र
त्रैऽपस्पृष्टुं स्नातुमुपस्थातु रविं स्तोतुं॥ उपगतस्य सतो निध्यर्थप्राप्तस्य॥

विग्रहवंतंसुस्पष्टमूर्त्तिंनृपतिं॥उपासकमुख्यःसतमावध्यकंवइतिघोषःमहीपतिस्त्रियःतंदृष्टुंजनाःपरितोधावंतंचलंति
स्वकंवादवमुच्येनमेकोंतेन्यस्त्वाविभुः॥अतोविग्रहवंतंतंददर्शनृपतिस्तदा॥प्रीतिमानयतंहृष्ट्वामुकुंदंकृतवान्कथां॥
तमभिप्रस्थितंनृपोविवस्वंतंससत्राजित्॥लोकानुग्रसयस्मेतान्येनत्वंसततंप्रभो॥तदेतन्मणिरत्नंमेभगवंदस्तुमर्हसि
ततस्यमंतकमणिंदत्तवांस्तस्यभास्करः॥सतमावध्यनगरींप्रविवेशमहीपतिः॥तंजनापर्यधावंतसूर्योयंगच्छतीतिह
स्यसपुरींसविसिस्मायशजाल्वंतंपुरंतया॥तत्प्रसेनजितेदिव्यंमणिरत्नंस्यमंतकं॥ददौभ्रातेनरपतिःप्रेम्णासत्राजिद्भु
त्तमः॥समणिःस्यंदतेरुक्मंवृष्ण्यंधकनिवेशने॥कालवर्षीचपर्जन्योनचव्याधिभयंमहत्॥लिप्सांचक्रेप्रसेनात्तुम
णिरत्नस्यमंतकं॥गोविंदोनचतंलेभेशक्तोपिनजहारसः॥कदाचिन्मृगयांजातःप्रसेनस्तेनभूषितः॥स्यमंतककृतेसिं
हाद्वधंप्रापवनेचरात्॥अथसिंहंप्रधावंतंमृगराजंमहाबलः॥निहत्यमणिरत्नंचददायबिलमाविशत्॥ततोवृष्ण्यं
धकाःकृष्णंप्रसेनेवधकारणात्॥प्रार्थितंतंमणिंबुद्धासर्वाःवृष्ण्योशंकिरो॥सशंक्यमानोधर्मात्मिन्नकारीतस्यकर्मणा
अहरिष्येमणिमितिप्रतिज्ञायवनंययौ॥यत्रप्रसेनोमृगयामचरत्तत्रचाप्यगात्॥प्रसेनस्यपदंगृह्यपौरुषोराजकारिभि
तःपुरंतयाविस्मायेपेन्प्रविवेशस्यंदतेप्रहरतिरुक्मंसुवर्णंकिंस्वराजोजांबवन्शंकिरेशंकितवंतत्कारीकृत्तां॥

डाक्टर भाऊ दाजी स्मारक
DR. BHAU DAJI
MEMORIAL

॥आसकारिभि-आनितेः-अनुनीय-आश्वास्य॥

ऋक्षवंतंगिरिवरंविंध्यंचगिरिमुत्तमं॥अन्वेषयन्परिश्रांतःसददर्शमहामनाः॥साश्वंहतंप्रसेनंतुनाविंदच्चैवतंमणिं॥अथसिंह
प्रसेनस्यशरीरस्याविदूरतः॥ऋक्षेणनिहतोहृष्टापदैःकृष्णम्सूचितः॥पदैस्तैरन्वियायाथगुहामृक्षस्यमाधवः॥महत्यृक्षबिले
वाणींशुश्रावप्रमदेरितां॥धात्र्याकुमारमादायसुतंजांबवतोनृप॥क्रीडापयंत्यामणिनामारोदीरित्यथेरितां॥धात्र्युवाच॥सिं
हःप्रसेनमवधीत्सिंहोजांबवताहतः॥सुकुमारकमारोदीस्तवह्येषस्यमंतकः॥व्यक्तीकृतस्यशब्दःस्यत्तूर्णंचापिबिलंययौ॥
प्रविश्यतत्रभगवान्तस्यऋक्षबिलमंजसा॥स्थापयित्वाबिलद्वारियदूंल्लांगलिनासह॥शार्ङ्गधन्वाबिलस्थंतुजांबवंतंददर्शह॥
युयुधेवासुदेवस्तुबिलेजांबवतासह॥बाहुभ्यामेवगोविंदोदिवसानेकविंशतिं॥प्रविष्टेतुबिलेकृष्णेबलदेवपुरःसराः॥
पुरींद्वारवतीमेत्यहतंकृष्णंन्यवेदयन्॥वासुदेवस्तुनिर्जित्यजांबवंतंमहाबलं॥लेभेजांबवतींकन्यांऋक्षराजस्यसंमतां॥म
णिंस्यमंतकंचैवजग्राहात्मविशुद्धये॥अनुनीयऋक्षराजानंनिर्ययौचततोबिलात्॥एवंसद्वारकांकृष्णस्समविनीतैःपुरस्सरैः
एवंसमणिमाहृत्यविशोधात्मानमच्युतः॥ददौसत्राजितेतंवैसर्वसात्वतसंसदि॥एवंमिथ्याभिशस्तेनकृष्णेनामित्रयाति
ना॥आत्माविशोधितःपापाद्विनिर्जित्यस्यमंतकं॥सत्राजितोदशत्वासन्भार्यास्तासांशतंसुताः॥ख्यातिमंतस्त्रयस्तेषांभंगकारस्तुपूर्वजः॥

हरि· ८६

सत्त्वनामाव्रतानिप्रस्नापिनी चेति स्त्रः सत्त्वनामो क्रोष्टेः॥ कनीयस्या भार्यया माद्र्याः पुत्रस्य पृथाजितः प्रसव मनुवदति माद्रीपुत्रस्य

वीरो वातपति चैव उपस्त्रावांतथैव च॥ कुमार्यश्चापि विख्यातो वै दि कुन्ती तानराधिपः॥ सत्त्वनामो कुमारस्त्रीणां व्रतानि च दृढव्रत
तथा प्रस्नापिनी चैव भार्यांकिल्लाय तादृशे॥ स मान्त्रो नगकारा तु नारे जञ्चन रोत्तमो॥ यज्ञाते गुणसंपन्नो विख्यातो रूपसंपदे॥
मायपुत्रस्य यज्ञातो वृष्णि पुत्रो युधाजितः॥ यज्ञाते तनयो वृष्णेः स्वफल्क चित्रकस्तथा॥ स्वफल्ककाशिराजस्य सुतो भार्यमविं
दत॥ गान्दिनी नाम तस्यास्य गाः सदा प्रददौ पिता॥ तस्यां यज्ञे महाबाहु श्रुतिमानिति विश्रुतः॥ अक्रूरो यमहाभागो यज्वा विपुलद
क्षिणः॥ उपमद्गुस्तथा मद्गुमृदरश्चारिमेजय॥ गिरिक्षेधिश्रुतासां च सत्रुघ्नश्चारिमेजयः॥ धर्मभृच्चापि धर्मिचगृध्रमोजातक
स्तथा॥ अवाहप्रतिवाहौ च सुंदरी च वरांगना॥ विश्रुता सां च महिषा कन्या सा च वसुंधरा॥ रूपयौवनसंपन्ना सर्वसत्त्वम
नोहरा॥ अक्रूरेणोग्रसेनायांतु सुतौ द्वौ कुरुनंदनः॥ सुदेवश्चापदेवस्य यज्ञाते देववर्चसौ॥ चित्रकस्याभवन्पुत्राः पृथुर्विपृथु
रेव च॥ अश्वसेनोश्वबाहुश्च सुपार्श्वकगवेषिणौ॥ अरिष्टनेमेश्च सुता धर्मा धर्मभृतदेव च॥ सुबाहुर्बहुबाहुश्च श्रविष्ठा
श्रवणोस्त्रियो॥ इमं मिथ्याभिशास्तिं यः कृष्णस्य समुदाहृतो॥ वेद मिथ्याभिशापास्तं स स्पृशाति कदाचन॥ ५॥ राम ८६

ति मिथ्याभिशस्ते मिथ्याभिशापं वेदज्ञानाति॥

विशोनवाधिकेध्याये सत्राजितधनव्यते॥ यदुवंशो क्लिसंपूर्णिमणिरानयनं तथा॥ तत्र नयदुसमदिसत्राजितेकृष्णेयतमणिरत्नमय
ततत्तबन्तुरक्रुरः अंतरं छिद्रमविच्छन्नशातमेधवनाहारयामासेतिव्यक्तिताम्पः तत्रहिनुमहाहीतिहियस्मानत्यनामामणिर

इति विज्ञेषु हरिवंशेस्यमंतकप्रत्याख्याने॥ वैशं॥ यत्तमत्राजितेकृष्णेमणिरत्नस्यमंतकं॥ अदात्तहारयामास बभ्रुर्वेशत
धन्वना॥ सदा हि प्रार्थयामास सत्राजितो मणिमनिंदितो॥ अक्रूरोंतरमन्विच्छन्मणिं चैवस्यमंतकं॥ सत्राजितं ततो हत्वा शतधन्वा
महाबलः॥ रात्रौ तन्मणिमादाय तत्राक्रूराय दत्तवान्॥ अक्रूरस्तु तदा रत्नमादाय नरतर्षभ॥ समयाञ्कारयांचक्रे नान्ये
द्यो हंतव्ये तिवै॥ वयमभ्युपगच्छामः कृष्णेन त्वा प्रधर्षितं॥ ममाद्य द्वारका सर्वा वशेति स्थत्य संशयं॥ हतेपितरि दुःखार्तांसत्य
भामा यशस्विनी॥ प्रययौ रथमारुह्य नगरं वारणावतं॥ सत्यभामा तु तद्वृत्तं भोजस्य शतधन्वनः॥ भर्तुर्निवेद्य दुःखार्ता पार्श्व
स्थाश्रूण्यवर्तयत॥ पांडवानां तु दग्धानां हरिः कृत्वोदकक्रियां॥ कुल्यार्थं चापि पांडूनां योजयत सात्यकिं॥ ततस्त्वरितमागत्य
द्वारकां मधुसूदनः॥ पूर्वजं हलिनं श्रीमानिदं वचनमब्रवीत॥ हतः प्रसेन सिंहेन सत्राजित्छतधन्वना॥ स्यमंतकः सम प्रगामी
तस्य प्रभुरहं विभो॥ तदारोह रथं शीघ्रं भोजं हत्वा महारथ॥ स्यमंतकं महाबाहो अस्माकं स भविष्यति॥ ततः प्रववृते यु
द्धं तुमुलं भोजकृष्णयो॥ शतधन्वा ततोक्रूरं सर्वतो दिशमैक्षत॥ स च स्यमंतकं अन्विच्छन्मामाससामीत्ततः अक्रूरोपदेश
तां समर्थं स पथा अभ्युपपत्स्यामः साहाय्यं करिष्यामः इत्यर्थः मनन्यघनीघीरः कृतार्थे कृत्यकार्यार्थे समागमी मामागता॥

हरि·
८३

संरब्धोयुद्धसंक्रोशाद्याज्ञात्॥मणिवेचनाघ्रहेतोः हार्दिक्यंहृदिकपुत्रंशतधन्वानेनास्युपपद्यतसहायार्थंनागच्छत्॥हृदयया

संरब्धोतावुभौहृष्टातत्रयोजननार्दनौ॥अनायोववधमर्दैवकृत्वायोजननार्दनौ॥शक्तोपिशाघ्यमर्दिक्यमक्रूरोनाभ्यपद्यत॥
अपयानेततोबुद्धिंभोजश्चक्रेभयार्दितो॥योजनानांशतंसाग्रंहृदययाप्रत्यपद्यत॥विख्याताहृदयानामशतयोजनगामिनी॥
भोजस्यवडवाराजन्ययाकृष्णमयोधयत॥साक्षीणांजवेनहृदयामध्वनःशतयोजनगामिनी॥भोजस्यवडवाराजन्ययाकृ
ष्णमयोजयत॥क्षीणांजवेनहृदयामध्वनःशतयोजने॥दृष्ट्वारथस्यस्वांबुद्धिंशतधन्वानमार्दयत॥ततस्तस्याहृदयायास्तुश्र
मघ्नेदाश्चमारत॥स्वमुत्थेतुरथप्राणःकृष्णोराममथाब्रवीत्॥तिष्ठेहत्वंमहाबाहोदृष्टदोषोहृयामया॥पद्भ्यांगत्वाहरिष्या
मिमणिरत्नस्यमंतकं॥पद्भ्यामेवततोगत्वाशतधन्वानमच्युतः॥मिथिलामभितोराजन्जघानपरमास्त्रवित्॥स्यमंतकं
चनापश्यद्धत्वाभोजंमहाबलं॥निवृत्तंचाब्रवीत्कृष्णंरत्नंदेहीतिलांगली॥नास्तीतिकृष्णश्चोवाचततोराममरुषान्वितः॥धिक्
शब्दपूर्वमसत्कृत्यप्रत्युवाचजनार्दनं॥भ्रातृत्वान्मर्षयाम्येषस्वस्तितेस्तुव्रजाम्यहं॥कृत्यंनतस्मिन्नेवकालेतुबभ्रुर्मतिमतांवरः राम· ८३
+ नमेद्वारकयानत्वयोनचवृष्णिभिः॥प्रविवेशततोरामोमिथिलामरिमर्दनः॥सर्वकामैरुपहृतैर्मैथिलेनाभिपूजितः॥
नानारूपान्क्रतून्सर्वानाजहारनिरर्गलान्॥दीक्षामयंसकवचंरक्षार्थंप्रविवेशह॥स्यमंतककृतेप्राज्ञोगांदीपुत्रोमहायशाः॥
अथरत्नानिचान्यानिधनानिविविधानिच॥

अर्थार्यं॥दृष्टदोषोनिसृष्टा॥उपचितेषुत्वक्रूरःनिर्गजान्मयदीनातविसवान्॥

विनियुक्तानिकृतवान्॥अडनावआर्षःआयाम्नात्प्यलायत॥कल्वेनिम्नप्रदेशेलेनेनिधेःसमीपेचआर्यकेशायत्॥रोषः॥संरूढः

षष्टिवर्षाणिधर्मात्मायज्ञेष्वेवन्ययोजयत॥अक्रूरयज्ञाइतितेख्यातास्तस्यमहात्मनः॥बह्वन्नदक्षिणाःसर्वेसर्वकामप्रदायि
नः॥अथदुर्योधनोराजागत्वासमिथिलांप्रभुः॥गदाशिक्षांततोदिव्यांबलभद्रादवाप्तवान्॥प्रसाद्यतुततोरामोवृष्ण्यंधकमहा
रथैः॥आनीतोद्वारकामेवकृष्णेनचमहात्मना॥अक्रूरस्त्वंधकैःसार्धमपायात्पुरुषर्षभ॥हत्वासत्राजितंयुद्धेसहबंधुमहाब
लं॥ज्ञातिभेदभयात्कृष्णस्तमुपेक्षितवांस्तदा॥अपयातेतथाक्रूरेनावर्षत्पाकशासनः॥अनावृष्ट्याततोराष्ट्रमभवद्बहु
धाकृशं॥ततःप्रसादयामासुरक्रूरंकुकुरांधकाः॥पुनर्द्वारवतींप्राप्तेतस्मिन्दानपतौततः॥प्रववर्षसहस्राक्षःकच्छेजल
निधेस्तदा॥कन्यांचवासुदेवायस्वसारंशीलसंमतां॥अक्रूरःप्रददौधीमान्प्रीत्यर्थंकुरुनंदन॥अथविज्ञाययोगेनकृ
ष्णोबभ्रुगतंमणिं॥सभामध्यगतंप्राहतमक्रूरंजनार्दनः॥यत्तद्रत्नंमणिवरंतवहस्तगतंप्रभो॥तन्मेप्रयच्छमानार्हमयिमा
नार्यकंकृथाः॥षष्टिवर्षगतेकालेयद्रोषोभूत्ममानघ॥ससंरूढोमहत्कालात्कालात्ययोमहान्॥सततःकृष्णवचना
त्सर्वसात्वतसंसदि॥प्रददौतंमणिंबभ्रुरक्लेशेनमहामतिः॥ततस्तमार्जवप्राप्तंबभ्रोर्हस्तादरिंदम॥ददौहृष्टमनाःकृष्णस्तं
मणिंबभ्रवेपुनः॥सकृष्णहस्तात्संप्राप्यमणिरत्नंस्यमंतकं॥

हृदिमालःततोरोषात्॥कालात्ययःकालस्यात्ययोमहान्नवेदिति

रोषःआर्जवात्तत्संक्रेतात्॥

श्रावश्यकं वै॥ इत्येकोनचत्वारिंशः॥ चत्वारिंशत्तमेऽध्याये भगवद्दिव्ययोगमहात्॥ जनमेजयनृपस्य प्रश्ननारतप्रस्तुते कृष्णाव
तारप्रसंगेन नानापुराणावर्णितवाराहादिप्रादुर्भावविशेषश्रवणाय राजा पृच्छति॥ प्रादुर्भावनिति वाराहाः वाराहस्य प्रादुर्भाव
तस्य वाराहस्य विधिं विधानं प्रकारमिति यावत्॥ विस्तरं विस्तारं वपुः प्रमाणं कर्मगुणसंतानं कर्मणां गुणानां च विस्तारः हे

श्रावाध्यगांदिनी पुत्रो विरराजेऽद्युमानिव॥ यस्त्वेतच्छृणुयान्नित्यं शुचिर्भूत्वा समाहितः॥ सुखानेतश्रवकल्याना फलनागीन वि
ष्यति॥ श्रावयन्भवता चापि यशस्यातिर्न संशयः॥ भविष्यति निपश्रेष्ठ सत्यमेतद्ब्रवीमि ते॥ ॥ इति हरिवंशे सोमवंशसमु
द्भव॥ जन्मेजय उ०॥ प्रादुर्भावपुराणेषु विष्णोरमिततेजसः॥ सतो कथयतामेव वाराह इति न श्रुतं॥ न जाने तस्य चरितं न
विधं न च विस्तरं॥ न धर्मगुणसंतानं न हेतुं न मनीषितं॥ किमात्मको वराहः स का मूर्तिः का च देवता॥ किमाचारप्रभावो वा॥
किं वा तेन तदा कृतं॥ यज्ञार्थं समवेतानां मिषतां द्विजन्मनां॥ महावराहचरितं कृष्णद्वैपायनेरितं॥ यत्र नारायणो ब्रह्म वा
राहं रूपमास्थितः॥ दंष्ट्रया गां समुद्रस्थामुज्जहारारिमर्दनः॥ विस्तरेणैव कर्माणि सर्वाणि रिपुघातिनः॥ श्रोतुमिच्छाम्यशेषे
ण हरेः कृष्णस्य धीमतः॥ कर्मणामानुपूर्व्यं च प्रादुर्भावाश्च ये विभो॥ या चास्य प्रकृतिर्ब्रह्मंस्तां त्वमाख्यातुमर्हसि॥ कथं
च भगवान्विष्णुः सुरेशोऽरिनिषूदनः॥ वसुदेवकुले धीमान्वासुदेवत्वमागतः॥

तु कारणं मनापितं प्रयोजनं किमात्मकः किं स्वरूपः का मूर्तिः किं शरीरं का सा देवता किमाचारप्रभावः कस्तस्याप्याचारप्रभाव
श्चेत्यर्थः॥ यज्ञार्थं सर्वं ज्ञार्थं समवेतानां मिलितानां ब्रह्मन्वेदव्यासं पायनप्रकृतिस्वभावः स्वरूपं वा॥ ॥

चक्रंसमूहं नृपाणां वा वर्षः कर्मैः पादविक्षेपैः त्रिदशेभ्य यादेवार्थं मृग्यं पतद्ग इति मार्गान्सुरादयो लोकाः त्रिवर्गप्रभवा धर्मादित्रिकं तव लो
क्यत इति लोकं भुवनं एकार्णवं जलनिर्जितमर्यादं॥ दंष्ट्रादंष्ट्रेण दंष्ट्रा नाम दर्शनं तेन वर्त्मना मार्गेण प्रकारेण यः पुराणोऽपु

कथं च भगवान्विष्णुः सुरेशोऽरिसूदनः॥ वसुदेवकुले धीमान्वासुदेवत्वमागतः॥ अमरैरावृतं पुण्यं पुण्यकृद्भिरलंकृतं
देवलोकं विमुच्यायं मर्त्यलोकमिहागतः॥ देवमानुषयोर्नेता भुवः प्रभवो विभुः॥ किमर्थं दिव्यमात्मानं मानुष्ये समयोज
यत्॥ यश्चक्रं वर्तयत्येको मानुष्याणां मनोमयं॥ मानुष्ये स कथं बुद्धिं चक्रे चक्रभृतां वरः॥ गोपायनं यः कुरुते जगतः सार्वलौकि
कं॥ स कथं गां गतो विष्णुर्गोपत्वमगमत्प्रभुः॥ महाभूतानि भूतात्मा यो दधार चकार च॥ श्रीगर्भः स कथं गर्भे स्त्रिया भुवि चचार
स्थितः॥ येन लोकान्क्रमैर्जित्वा त्रिभिस्त्रींस्त्रिदशेप्सया॥ स्थापिता जगतो मार्गास्त्रिवर्गप्रभवास्त्रयः॥ योऽन्तकाले जगत्पीत्वा कृ
त्वा तोयमयं वपुः॥ लोकमेकार्णवं चक्रे दृश्यादृश्येन वर्त्मना॥ यः पुराणः पुराणात्मा वाराहं रूपमास्थितः॥ विषाणाग्रेण व
सुधामुज्जहारारिसूदनः॥ यः पुरा पुरुहूतार्थे त्रैलोक्यमिदमव्ययं॥ ददौ जित्वा वसुमतीं सुराणां सुरसत्तमः॥ येन सिंह
वपुः कृत्वा द्विधा कृत्वा च तत्पुनः॥ पूर्वं दैत्यो महावीर्यो हिरण्यकशिपुर्हतः॥ यः पुरा ह्यनलो भूत्वा और्वः संवर्तको विभुः॥ पा
ताले स्थोऽर्णवगतः पपौ तोयमयं हविः॥ यत इति शेषः विषाणाग्रेण दंताग्रेण सुराणां सुरेभ्यः द्विधा नृहरिरूपत्वात्॥

युगे युगे सृष्टे सृष्टे पितामहं गृहं पंकजं उद्भिक्षः उद्धिक्षः तिमिरं योगमायां ॥ सुराणिणां देवमाता निहते पूर्णमनोरथं शलिलेशयाद्यमु
द्गजलेखतान्देवान्वस्वादान् ॥ सुधात्रिणां सुहृद्धरकाणि ॥ हव्यं देवानामन्नेन ददेताति हव्याहृतान् कव्यं पितॄणाम न्नेन ददेताति

सहस्रचरणं ब्रह्मसहस्रेशुसहस्रदं ॥ सहस्रशिरसं देवं यमाहुर्वै युगे युगे ॥ नाभ्यारणि समुत्पन्नं यस्य पितामहं गृहं ॥ नाभ्यारणि
समुत्पन्नं यस्य पितामहं गृहं ॥ एकार्णवगते लोके नष्टे स्थावरजंगमे ॥ येनते निहता दैत्याः संग्रामे तारकामये ॥ सर्वदेवमयं कृ
त्वा सर्वायुधधरं वपु ॥ गरुडस्थेन चोद्भिक्षः कालनेमिर्निपातितः ॥ निर्जितश्च महादैत्यस्तारकश्च महासुरः ॥ उत्तरान्ते समुद्र
स्य क्षीरोदस्यामृतोदधे ॥ यः शेते शाश्वतं योगमास्थाय तिमिरं महत् ॥ सुरारणी गर्भमधत दिव्यं तपः प्रकर्षाददितिः पुरा यं ॥ शं
कं च यो दैत्यगणावरुद्धं गर्भावदानेन नगं चकार ॥ पदानि यो लोकमयानि कृत्वा चकार दैत्यान् सलिलाशयस्थान् ॥ कृत्वा च दे
वांस्त्रिदिवस्य देवांश्चक्रे सुरेशं त्रिदशाधिपत्ये ॥ पात्राणि दक्षिणां दीक्षां चमसोलूखलानि च ॥ गार्हपत्यं च वैधिनाश्चवाहार्यं
च कर्मणि ॥ अग्निमाहवनीयं च वेदं चैव कुशास्तृतिं ॥ प्रोक्षणीयं ध्रुवं चैव अवभृथं तथैव च ॥ सुधात्रिणी च यश्चक्रे हव्यकव्य
प्रदानसृवे ॥ हव्यादांश्च सुरांश्चक्रे कव्यादांश्च पितॄनपि ॥ भागार्थे मंत्रविधिना यश्चक्रे यज्ञकर्मणि ॥ यूपान्समित्स्रुवं सोमं पवि
त्रं परिधानपि ॥ यज्ञियानि च द्रव्याणि यज्ञांश्च सचयानलान् ॥ सदस्यान्यजमानांश्च मेधादीश्च क्रतूत्तमान् ॥ विबभाज
पुरा सर्वं पारमेष्ठ्येन कर्मणा ॥ युगानुरूपं यः कृत्वा लोकाननुपरिक्रमान् ॥ क्षणा लवाश्च काष्ठाश्च कलास्त्रैकाल्यमेव च ॥ मु
हूर्तास्तिथयो मासाः पक्षाः संवत्सरास्तथा ॥ कव्यास्तान् ॥ सचयानलान् ॥ सहस्यैः स्थापनैरनलैश्च वर्तत इति सचयानलस्तान्प
रमेष्ठेन रोश्वर्येण ॥ ग ॥ व ॥ २

प्रमाणं त्रिविधं दिव्यु त्रिविधं प्रत्यक्षानुमानेशाब्देनेदेन त्रिषु लोकेषु भूतादिकालेषु वा ॥ क्षेमाणि शराराणि उपचयो वृद्धिः लक्षणं शुभाशुभ
चक्रं चिह्नं ॥ अयो वर्णा इत्यादीनां सृष्टा इत्यनेन संबंधः सृष्ट इत्यग्रहणमत्रैवर्णिकत्वात् त्रैकाल्यं भविता नुविता वितस्य समयाध्युषित

क्षणा लवाश्च काष्ठाश्च कलास्त्रैकाल्यमेव च ॥ मुहूर्तास्तिथयो मासाः पक्षाः संवत्सरास्तथा ॥ ऋतवः कालयोगाश्च प्रमाणं त्रिविधं त्रि
षु ॥ आयुः क्षेत्राण्युपचयो लक्षणं रूपसौष्ठवं ॥ त्रयो वर्णास्त्रयो लोकास्त्रैविद्यं पावकास्त्रयः ॥ त्रैकाल्यं त्रीणि कर्माणि त्रयोपाय
स्त्रयो गुणाः ॥ सृष्टा लोकास्त्वयोनंता येनाप्यं तेन वर्त्मना ॥ सर्वभूतगुणः सृष्टाः सर्वभूतगुणात्मका ॥ नृणामिंद्रियपूर्वेण योगेन र
मते च यः ॥ गतागती च यो नेता सर्वत्र जगदीश्वरः ॥ यो गतिर्धर्मयुक्तानामगतिः पापकर्मणां ॥ चातुर्वर्ण्यस्य प्रभवश्चातुर्हो त्रस्य
रक्षितः ॥ चातुर्वैद्यस्य यो वेत्ता चातुराश्रमसंश्रयः ॥ दिगंतरं नभो भूमिरापो वायुर्विभावसुः ॥ चन्द्रसूर्यमयं ज्योतिर्योगी श
क्षणदांतकः ॥ यः परं श्रूयते ज्योतिर्यः परं श्रूयते तमः ॥ यः परं प्राकृत परं यः परं परमात्मनः ॥ नारायणपरा वेदा नारायणप
रा क्रिया ॥ नारायणपरो धर्मो नारायणपरा गतिः ॥ नारायणपरं सत्यं नारायणपरं तपः ॥ नारायणपरो मोक्षो नारायणप
रायणः ॥ आदिरादिस्तु यो दिव्यो यश्च दैत्यांतको विभुः ॥ युगांते शेषकालो यस्य यस्य लोकांतकांतकः ॥ सेतुर्यो लोकसेतूनां
मेध्यो यो मेध्यकर्मणां ॥ वेद्यो यो वेदविदुषां यः प्रभुः प्रभवात्मनां ॥

रूपं ॥ त्रीणि कर्माणि सात्विकादीनि वा ॥ त्रयोपायाः संधिरार्षः साम दाम भेद दंडा गुणाः सत्वादयः अनंताश्च संबंधसंचाराः ॥

हरि. ९०

अनंतेनेश्वरेण कर्मणा संकल्परूपेण॥ संकोचावनेनेत्यपेक्षायामाह सर्वभूतगुणासृष्टा सर्वेषां भूतानां च्छित्यादीनां गुणानां च सृ
ष्टा॥ सर्वभूतगुणात्मकः सर्वभूतगुणस्वरूपभूतः रमणमिंद्रियरूपेण योगेन रमते च यः भूणो शरीरिणामिंद्रियपूर्वेण इंद्रिय
प्रधानेन योगेनोपायेन विषयसंबंधेन रमते जीवं रमयति॥ अंतर्भूतो तत्र आह क्रोधव्यः गतागता सोमरणजन्मसो विपश्यंप
श्यो वार्य ईश्वरो नेता नियामकः सर्वत्र जगति ब्रह्मांडे योगतिराश्रयश्चापद्रकुको वा॥ अगतिरूपे तत्कः चत्वारो वर्णाः समाहृता इ
ति चातुर्वर्ण्यं॥ तस्य प्रभवं भावयित्वा॥ चतुर्भिर्होत्रादिभिरनुष्ठेयं कर्म चातुर्होत्रं तस्य रक्षिता चातुर्विद्यस्य चात्वारो वेदाः समा

सोमभूतस्तु सौम्यानामग्निभूतोऽग्निवर्चसां॥ मनुष्याणां मन्मभूतस्तपोभूतस्तपस्विनां॥ विनयो नयवृत्ता
नां तेजस्तेजस्विनामपि॥ सर्गाणां सर्गकारश्च लोकहेतुरनुत्तमः॥ विग्रहो विग्रहार्हाणां गतिर्गतिम
तामपि॥ आकाशप्रभवो वायुर्वायुप्राणो हुताशनः॥ देवा हुताशनप्राणाः प्राणोऽग्नेर्मधुसूदनः॥ ३॥

हुता इति चातुर्विद्यं॥ दिगंचतरो दशमथाश्रयः नभो भूतः आकाशाईवासंगः विभावसुर्वह्निरूपः क्षणादांतकः दिनकरः॥ दिव्य अ
लौकिकः लोकांतकांतकः मृत्युरपि मृत्युः लोकसेतुर्भूतानां धर्ममर्यादा भूतानां मन्वादीनामपि सेतुः॥ समर्यादाप्रमाणानामपि प्रमा
णमित्यर्थः॥ मेध्यकर्मणां ब्राह्मणादिकर्तॄणामपि मेध्यः शोधकः प्रभवात्मनामुत्कृष्टजीवानां दक्षादीनामपि प्रभुः वायुप्राणः स्थि
तिहेतुर्यस्य सः

राम. ९०

रसाद्रक्तादिपरिणामाच्छोणितस्य संभूतः संभवः मकाम कृत शुक्रः रसो मूलेन रसो मूलं कारणं यस्य तेन कर्मणा॥ एषो रसा
द्भवो विभवे शिपुष्णाति परिवर्द्धयल्लगानि॥ प्रथमं स्थानं हृदयं॥ पश्चिमं कायं जघनादिपदांतं॥ ऊर्ध्व राँ देशोत्व्यायद्वतेन प्रसा

रसाद्धे शोणितं जातं शोणितान्मांसमुच्यते॥ मांसात्तु मेदसो जन्म मेदसोऽस्थि निरुच्यते॥ अस्थ्नो मज्जा समभवन्मज्जातः शुक्रसंभ
वः शुक्रोऽ गर्भसमभवद्रसमूलेन कर्मणा॥ तत्राप प्रथमो भागः स सौम्यो राशिरुच्यते॥ गर्भोष्मसंभवो ग्निर्यो द्वितीयो राशिरु
च्यते॥ शुक्रं सोमात्मकं विद्यादार्तवं पावकात्मकं॥ भावा रसात्मकास्तेषां वीर्यं च शशिपावकं॥ कफवर्गे भवेच्छुक्रं पित्तवर्
गे च शोणितं॥ कफस्य हृदयं स्थानं पित्तं नाभ्यां प्रतिष्ठितं॥ देहस्य मध्ये हृदयं स्थानं तन्मनसः स्मृतं॥ नाभीकोष्टांतरं यत्तु तत्र
देवो हुताशनः॥ मनः प्रजापतिर्ज्ञेयः कफः सोमो विभाव्यते॥ पित्तमग्निः स्मृतो ह्येवमग्नीषोमात्मकं जगत्॥ एवं प्रवर्तिते गर्भे व
र्द्धितेऽर्बुदसंनिभे॥ वायुः प्रवेशनं चक्रे संगतः परमात्मनः॥ ततो गानि विसृजति बिभर्ति परिवर्तयन्॥ स पंचधा शरीरस्थो
भिद्यते वर्द्धते पुनः॥ प्राणोऽपानः समानश्च उदानो व्यान एव च॥ प्राणोऽस्य प्रथमं स्थानं वर्द्धयन्परिवर्तते॥ अपानः पश्चिमं का
यमुदानोर्ध्वं शरीरिणः॥ व्यानो व्यानच्छते येन समानः सन्निवर्तते॥ भूतावाप्तिस्ततस्तस्य जायतेंद्रियगोचरा॥ पृथिवी वायु
राकाशमापो ज्योतिश्च पंचमं॥ तस्येंद्रियनिविष्टानि स्वं स्वं योगं प्रचक्रिरे॥ पार्थिवं देहमाहुस्तु प्राणात्मानं च मारुतं॥
रयं संगमि शरीरायेन स व्यान इति योजना संनिवर्तयेत् आकुंचति स समानः इंद्रियगोचर भूतावाप्तिः इंद्रियविषयग्रहणांतरं
भवति

DR BHAU DAJI

हरि·
८१

तत्कुतः यतः पृथिव्यादीनि भूतानि तस्य शरीराणींद्रियाणि॥ विष्टानींद्रियगोलकाद्याश्रितानि स्वस्वयोगं स्वोपलब्धं प्रकुर्वंतीव।
न्नमानोपरोक्ष्या॥ देहानां पंचभौतिकेपि तारतम्यमाह॥ पार्थिवमिति॥ इंद्रियाद्याश्रियं घ्राणेंद्रियस्थानानि ज्योतिश्च ह्यः च
क्षुरिंद्रियं ज्योति॥ तेजो निरूप्यते जात्मासंधिराख्य॥ आत्मा बुद्धितेजः तेषां देहादीनां यंताः प्रवर्तकः यस्य मनसः सनातनाव

धिशरणकारणं योनितिजलान्त्रावप्रवर्तते॥ ज्योतिश्च रूपस्तेन आत्मा तेषां यंता मनास्वयं॥ ग्रामाश्च विषयश्चैव यस्य वीर्याश्च
वर्जिता॥ इत्येतान्यनुरूपः सर्वान्सृजल्लोकान्सनातनः॥ नैधनेस्मिन्कथं लोके नरत्वे विष्णुरागतः॥ एष मे संशयो ब्रह्मन् नेष
मे विस्मयो महान्॥ कथं गतिर्गतिमतामापन्नो मानुषीं तनुं॥ श्रुतो मे वृष्णिवंशस्य सर्वेषां चैव संभव॥ श्रोतुमिच्छामि
विष्णोस्तु वृष्णीनां च यथाक्रमं॥ आश्चर्यपरमं विष्णुं देवदेवैः स्म कथ्यते॥ विष्णोरुत्पत्तिमाश्चर्यं समाचक्ष्व महामुने॥
एतदाश्चर्यमाख्यानं कथयस्व सुखावहं॥ प्रख्यातबलवीर्यस्य विष्णोरमिततेजसः॥ कर्मणाश्चर्यभूतस्य विष्णोस्तत्त्वमि
होच्यतां॥ इति खिलेषु हरिवंशे॥ ४०॥ प्रश्नभारो महांस्तात त्वया युक्तः शार्ङ्गधन्वनः॥ यथाशक्ति तु वक्ष्यामि श्रूयतां वैष्ण
वं यशः॥

नाद्विषि॥ घनं॥ नैधने निधनप्रधाने॥ इति चत्वारिंशः॥ चत्वारिंशत्तमे मे से केस्रवणामात्वकापदे॥ परमात्मनो विचित्रा
र्थाः प्रादुर्भाव उदाराताः उद्देशं परिहरन्नुत्तरयति॥ प्रश्नभार इति॥ प्रश्नानि गोपीर्यज्ञाः इत्युक्तं शार्ङ्गधन्वनः संबंधाः॥

राम·
८१

उक्षिताप्रवृत्ताः हंत प्रहर्षप्रवृत्तौ कथादिभ्रांतो लोके नरं सहस्राच्चमित्यारंभ शाश्वतमित्युरंभमित्यंतानां आहुर्वेदविदो विप्रा इत्य
धर्मक्रियासंबंधः अत्र सहस्रशीर्षः संस्थातवचन्मउपासनार्थं यत् येसवने प्रातरादिहवने बोधयनादि कर्मपद्धतिशास्त्रेह

विष्णोः प्रभावश्रवणे दिष्टाते मतिरुच्छ्रिताः॥ हंत विष्णोः प्रवृत्तिं त्वं शृणु दिव्यां मयेरितां॥ सहस्रास्यं सहस्राक्षं सहस्रचरणं च यं॥
सहस्रशिरसं देवं सहस्रकरमव्ययं॥ सहस्रजिह्वं भास्वंतं सहस्रकरमव्ययं॥ सहस्रदं सहस्रादं सहस्रभुजमव्ययं॥ ह
वनं सवनं चैव हव्यं होतारमेव च॥ पात्राणि च पवित्राणि वेदीं दीक्षां चरुं स्रुवं॥ स्रुक्सोमं सूर्यमचलं प्रोक्षणीं दक्षिणा
यनं॥ अध्वर्युं सामगं विप्रं सदस्यं सदनं सदः॥ यूपं समित्कुशं दर्वी चमसोलूखलानि च॥ प्राग्वंशं यज्ञभूमिं च होतारं चयनं च य
त्॥ ह्रस्वानि प्रमाणानि स्थावराणि चराणि च॥ प्रायश्चित्तानि चार्घ्यं च स्थंडिलानि कुशांस्तथा॥ मंत्रं यज्ञवहं वह्निं भागं भा
गवहं च तत्॥ अग्रेभुजं सोमभुजं हुतार्चिषमुदायुधं॥ आहुर्वेदविदो विप्रा यं यज्ञे शाश्वतं विभुं॥ तस्य विष्णोः सुरेशस्य श्री
वत्सांकस्य धीमतः॥ प्रादुर्भावसहस्राणि समतीतान्यनेकशः॥ भूयश्चैव भविष्यंतीत्येवमाह प्रजापतिः॥ यत्पृच्छसि म
हाराज पुण्यं दिव्यकथं शुभे॥ यदर्थं भगवान्विष्णुः सुरेशो रिति पूर्वजः॥ देवलोकं समुत्सृज्य वसुदेवकुले भवत्॥

ध्यमाज्यादि पवित्राणि आविकादीनि॥ दीक्षा संस्कारव्रतविशेषः अयनमुद्गगादिक्रतादि सामगातारं सदने पत्नीशालासदो
धिष्ण्यस्थाने प्राग्वंशो विवर्द्धने हेतुरावृत्तिप्रधानात् अग्निविशेषणं च यने चिति उदायुधं उद्द्यतज्वालं प्रजापति भासो वेदो वा

हरि॰ प्रकृष्टो भवः सकलं जन्म प्रभवः तस्मै कार्यतः धर्मरक्षणाय ॥ भगवान्प्रजाकरो मनुरूपितस्य देहं समाश्रित इति संबंधः ॥ अथ यत्नं

८२ ततेहं संप्रवक्ष्यामि शृणु सर्वमशेषतः ॥ वासुदेवस्य माहात्म्यं चरितं च महाद्युते ॥ हितार्थं सुरमर्त्यानां लोकानां प्रभवाय च ॥
बहुशः सर्वभूतात्मा प्रादुर्भवति कार्यतः ॥ प्रादुर्भावांश्च वक्ष्यामि पुण्यान्दिव्यान्गुणैर्युतान् ॥ छंदोभिर्निरुदारामिस्तुतिभि
समलंकृता ॥ शुचिः प्रयतवान्भूत्वा निबोध जनमेजय ॥ इदं पुराणं परमं पुण्यं वेदैश्च संमितं ॥ हंत ते कथयिष्यामि वि
ष्णोर्दिव्यं कथां शृणु ॥ यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ॥ धर्मसंस्थापनार्थाय तदा संभवति प्रभुः ॥ तस्यैके महाराज
जस्तूर्तिर्भवति सत्तमा ॥ नित्यं दिविष्ठया राजंस्तपश्चरति दुश्चरं ॥ द्वितीया चास्य शयने निद्रायोगमुपाययौ ॥ प्रजासंहार
सर्गार्थं किमध्यात्मविचिंतकं ॥ सुप्त्वा युगसहस्रं स प्रादुर्भवति कार्यतः ॥ पूर्णे युगसहस्रे तु देवदेवो जगत्पतिः ॥ पितामहो
लोकपालाश्चंद्रादित्यो हुताशनः ॥ ब्रह्मा च कपिलश्चैव परमेष्ठी तथैव च ॥ देवाः सप्तर्षयश्चैव त्र्यंबकश्च महायशाः ॥ वायुः स
मुद्राः शैलाश्च तस्य देहं समाश्रिताः ॥ सनत्कुमारश्च महानुभावो मनुर्महात्मा भगवान्प्रजाकरः ॥ पुराणदेवोऽथ पुराणचक्रे प्र राम॰
दीप्तवैश्वानरतुल्यतेजाः ॥ येनार्णवमध्यस्थौ नष्टे स्थावरजंगमे ॥ नष्टे देवासुरगणे प्रणष्टोरगराक्षसे ॥ योद्धुकामौ सुदु ८२
र्धर्षौ दानवौ मधुकैटभौ ॥ ब ॥

तदं पुराणदेवः अनादिसिद्धपरमेश्वरः पुराणजाव भोगायतनातिवक्रे ॥ येन चार्णवमध्यस्थौ मधुकैटभौ हताविति संबंधः ॥

वेदो विष्णुः श्रुतिसमाहितः वेदप्रतिपाद्यः यत्र प्रादुर्भावे विष्णुर्वाराहं रूपमास्थितः सन्महीं दंष्ट्रया समुद्धृत्य पृथिवीं पुनः स्वकारे निदधम
लोकानां तेनासौ यः किमात्मको वराहोऽसावित्यपेक्षायां वेदपाद इत्यादि ॥ फलवीर्यसमिकलवीर्यमहोऽवधयोस्त्रीय्योऽपरस्य सः समास

